
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय

हस्तलिखित संग्रह

दाखल क्र. M-2160 विषय

नांव न्याय दीपिका M.SS तर्कसंग्रह दीपिका

लेखक / लिपीकार / टिका - नीलकंठ भट्ट रचित प्रकाशसह

पृष्ठ 70 काळ पूर्ण / ~~अपूर्ण~~

Checked 2012

न्याय दीपिका

श्रीगुरुदक्षिणामूर्तयेनमः वंदेगुरुं शिवंसांबंदक्षिणामूर्त्तिमव्ययं। यदृष्टलेनमंदोपि विंदेत्तुरुसमानतां १ परिशि
नतंत्रयस्यनिर्विघ्नपरिसमाप्तयेसमाचरितंमंगलमिष्टरत्नपात्मकं शिष्यशिक्षायै निवध्नन्चिकीर्षितंप्रतिजानी
ते विश्वेश्वरमिति। गिरंगुरुं। निखिलविद्यानामुपदेष्टारंइदमपि विश्वेश्वरेविशेषणं। गिरं गुरुमिति पाठेतु सरस्वती
विद्यागुरुंचप्रणिपत्येत्यर्थो बोध्यः। स्वग्रंथस्येतरग्रंथैरगनार्थतांदर्शयति शिशुहितामिति। तर्कसंग्रहदीपिकां। त
र्कसंग्रहार्थप्रकाशिकां। आचरितस्यमंगलस्यतन्निबंधनस्य च फलंदर्शयति चिकीर्षितस्येत्यादिना। चिकीर्षितंप्रति
जानीतइतिशिष्यावधानायेत्यादि। ननुसमाप्तिंप्रतिमंगलस्यकारणतास्यान्वयेनदानंदाचरणंयुज्यतेसैवनसं
भवतीत्याशंकनेनान्विति। व्यभिचारादिति। अन्वयव्यतिरेकव्यभिचारज्ञानरूपप्रतिबंधकसत्वान्नियतान्वयव्य
तिरेकसहचारनिश्चयरूपकारणासंभवेननकारणत्वनिश्चयरूपाभिसंधिः। सामान्यभावइति। अतोनव्यभिचार

इत्यनेनान्वयः। विघ्नान्यूनसंख्याकस्य बलवत्तरस्य वा मंगलस्य विघ्ननिरसनद्वारा समाप्तिसाधनत्वेन तादृशमंगला
भावान्नान्वयव्यभिचार इति भावः। बहिरेवेति। जन्मान्तर एवेत्यर्थः। अतः कुत्रचिद्दृश्यकर्तुर्नास्तिकत्वेपि न क्षतिः
। अत इति। तादृशमंगलस्य विघ्नध्वंसद्वारा सत्वान्नव्यतिरेकव्यभिचार इत्यर्थः। एवं च कारणत्वं सिध्यतीति भावः
। परे तु अत उक्तहेतुद्वयात् न व्यभिचारः नान्वयव्यतिरेकव्यभिचार इति व्याचख्युः। मणिकृन्मते तु मंगलस्य विघ्न
ध्वंस एव फलं समाप्तिस्तु स्वसामग्रीवशादेवेत्याहुः एतत्तत्त्वमस्मदीयचिंतामणिव्याख्यायामनुसंधेयं। मंगलस्य श्रु
तिबोधितकर्त्तव्यताकत्वं व्यवस्थापयितुमाशंकते नन्विति। अनुमितश्रुतेरेवेति। अत्रायमाशयः श्रुतेर्वेदबोधितकर्त्त
व्यताकत्वरूपवक्ष्यमाणविधेयकोटिप्रविष्टत्वेपि तदंतर्भावेणाविधेयत्वमभ्युपगम्यते न तच्छ्रुतेरनुमितिपूर्वमसि
द्धत्वात् एतेन कर्त्रादिसाध्यकानुमितिविषयतामादाय यवान्हत्वादिकमनुमितमिति व्यवहाराभावेन श्रुतायनु

मितत्वव्यवहारः कथमिति शंकानिरस्ता अत्रैतो विधेयतानुपपादनेनतादृशव्यवहारे बाधकाभावात् एवकारो प्यर्थकः तेन मंग
लं कर्त्तव्यं समाप्तिफलकत्वादित्यनुमानरूपप्रमाणं तरसत्वेपि न क्षतिरिति। अन्येन त्ववबोधित कर्त्तव्यताकत्वसंबंधेन अ
त्रेरेवसाध्यता अग्निमग्र्यस्याप्यत्रैव तात्पर्यमेवं च श्रुतेरनुमितत्वोपपत्तिरित्याहुः। अलौकिकेति। विधिमंतरा रा
गादिमात्रप्रभवेत्यर्थः। अविगीतेति। धर्मशास्त्रानिषिद्धेत्यर्थः। शिष्टेति। वेदोक्तत्वज्ञानेन वेदविहितकर्मकारी म
र्थः। वेदोक्ताहिंसादिकर्त्तरि बौद्धेऽतिव्याप्तिवारणाय तत्तदीयांतं। आचारविषयत्वादिति। आचारः कृतिः। तस्याः स्व
त्वनियामकविषयतासंबंधेन हेतुत्वविवक्षया त्वेनेति नद्विषयत्वस्य हेतुत्वानुधावनमिति भावः। यथाक्रमे हेतुवि
शेषणप्रयोजनमाह मोजनादाविस्यादिना। ननु अलौकिकाविगीताचारविषयत्वस्यैव हेतुत्वास्तु अशिष्टाचारवि
षयेतादृशाहेतोरसत्वेन व्यभिचारासंभवादित्याशंका मिष्टायस्यापरिहरति शिष्टपदमिति। जलताडनादावशिष्ट

चारविषयेहेतोरसत्वंस्फुरद्यतिनकुर्यादिति स्वर्गादिफले व्यभिचारवारणायाचारविषयत्वेनेति विधेयतयाचारविषय
त्वार्थकमितिसंक्षेपः। तर्कपदस्यारोपार्थकत्वमत्र मंगलपितन्स्यादिसाधारणं न केवलं निर्विघ्नेति त्वं गतमिति। उपादानरू
पसंग्रहस्यासंभवादाहसंक्षेपेणेति। स्वरूपकथनं स्वरूपज्ञानानुकूलः शब्दः। एतावताद्व्यादिपदार्थाः विषया
पदार्थतत्त्वावधारणप्रयोजनं। संबंधश्च प्रतिपाद्यप्रतिपादकभावः पदार्थतत्त्वावधारणकामोऽधिकारीतिच
तुष्टयं प्रेक्षावत्प्रवृत्त्यंगं सूचितं। षण्णीं तत्वरूपत्वमवधारणायाह सुखबोधेनेति। सुखबोधरूपप्रयोजनस्यावगमेपि
तस्यान्यतःसिद्धत्वेनैतद्ग्रंथकरणे प्रयोजनाकांक्षानशमात्तोसाशयेनावतारयतिनन्विति तितिषां। भाष्यादिग्रंथा
नांमूलेसप्तपदार्थाइति। कुप्यत्वादिरूपीयेसमोपधपरसदन्यत्वमवंतःपदार्थाइत्यर्थः। अत्र सप्तत्वमयेसबुद्धिवि
रोधविषयत्वरूपं। एवमेवमत्रिमग्रंथस्यापिपर्यवसानमवसेयं। ननुसामान्यधर्मज्ञानस्यविशेषजिज्ञासांप्रतिहेतु

दीपि॰ प्र॰
३

त्वात्सामान्यलक्षणकथनानंतरमेव विभागो युक्तः तथा च मूले कथमादौ विभाग इति न्यूनतां परिहरति पदस्येति।
अर्थः। अभिधेयः उक्तव्युत्पत्त्या पदसंबंध्यभिधाविषयत्वस्य लाभेपि परसंबंधित्वांशस्याव्यावर्त्तकत्वादाह
अभिधेयत्वमिति लक्षणं। लभ्यत इति शेषः। तथा च न न्यूनतेति भावः। विभागादेवापदार्थत्वावांतरधर्मपुर
स्कारेण धर्मिप्रतिपादनादेव। अधिकसंख्याव्यवच्छेदार्थत्वादिति। तादृशसंख्यानिषेधसिद्धिफलकत्वादि
त्यर्थः। उद्देश्यविधेयभावस्थले उद्देश्यतावच्छेदके विधेयव्याप्यत्वभानमौत्सर्गिकमिति न्यायेनाह पदार्थस
मिति। इति व्यवच्छेदार्थत्वादिति। एतद्द्वयोर्व्यवच्छेदो निर्णीयत इति शेषः। तदर्थकत्वादित्यर्थः। सप्तभिन्न
भिन्नत्वमिति। द्रव्यादयो ये सप्त पदार्थाः तत्तद्भेदकूटविशिष्टभिन्नत्वं वक्तव्यमित्यर्थः। द्रव्यादिभेदसप्तकाभाव
वत्त्वमिति। द्रव्यादिभेदानामपि नैकप्रसिद्धानां सप्तानां कुत्राप्यसत्त्वेन तादृशभेदसप्तकत्वावच्छिन्नाभावस्य सर्वत्र ३

सत्वान्नादोषइतिभावः।वस्तुतस्तुपदार्थत्वंद्रव्यादिसमान्यतमत्वव्याप्यमितस्यपदार्थत्वंद्रव्यत्वादिसप्तोपाध्यन्यत
मवत्वव्याप्यमित्यर्थः। एवंचवक्ष्यमाणेषुसामान्यतमत्वाप्रसिद्धिशंकातत्समाधानपरस्पतनुसमान्यतमत्वमि
त्यादिग्रंथस्यान्यत्वेपिनक्षतिरितिध्येयं।एवमग्रेपीति।एवंरीत्याद्रव्यत्वादावपीत्यर्थः।द्रव्यमितिनन्वासंयोगवच
नंगमीमांसकमतेद्रव्यविभुमुपपन्नस्यतिनन्वित्याभदेनाबाधितप्रतीतेर्विषयासाधकत्वादाह अबाधितेति।प्रती
तिबलात्प्रात्यक्षिकप्रतीतिबलात्।तत्सद्द्रव्यत्वे।नुमानप्रमाणयतिनीलरूपाधारत्वयेतिसमवायेननील
रूपवत्त्वयेत्यर्थः।तेनकालिकादिसंबंधेनतस्यापिप्रसक्तत्वेपिनक्षतिः।एवमग्रेपिबोध्यं।तत्रद्रव्यत्वेतिद्वेसति
।अतिरिक्तत्वंव्यवस्थापयतिनुक्तद्रव्येषुतर्भावनिराचष्टेतमसइत्यादिना।अनुएव।रूपवत्वादेव।नव्याया
विति।अंतर्भावइत्यनुषज्यते।संबंधभेदाभिमायेणाहस्पर्शाभावादिति।इदंचध्वंसप्रागभावाधिकरणे।सं

दी.प्र.
४

नाभावो नांगीक्रियत इति प्राचीनमतताभिप्रायेणाः अन्यथा समवायावृत्तित्वस्पर्शात्सामान्याभावस्य दैशिकविशेषण
तयाप्यावायावघुत्पत्तिकालावच्छेदेन सत्ताव्यभिचरितत्वापत्तेः । वस्तुतस्तु निरवच्छिन्नदैशिकविशेषणतयानस्पृहे
त्वमिति ध्येयं । विषमव्याप्तमुक्त्वा तमभिधाय समव्याप्तमाह समदागतीति । सदागतिः विजातीयक्रिया । उपसं
हरति तस्मादिति । कुंभेपुनं तभावादित्यर्थः । तेजोभावरूपत्वादिति । प्रौढप्रकाशकतेजोभावरूपत्वांगीकारा
दित्यर्थः । अतः तमसस्सप्रदेशतेजः परमाणवादिस्वत्वेन तेजस्सामान्याभावसत्वेपि न क्षतिः । अणुकादिवार
णाय महदिति दिक् । घटादौ व्यभिचारवारणाय आलोकासहकृतेति । चक्षुर्ग्राह्यत्वं चक्षुर्जन्यज्ञानीय लौकिक
विषयत्वं । तेन तमस्या प्रत्येषघटादीनामपनयमर्यादयाभानेपि न क्षतिः । विशेषाभावं दृष्टांतयति आलोकाभाव
वदिति अप्रयोजकत्वशंकां वारयति रूपीति आलोकं विना रूपवत्वेन तमो विषयकचाक्षुषभ्रमोदयादाह अमायाः ४

मिति। कारणत्वादिति। अन्यथा धकारस्य घटादेश्चा स्वघायन्ते गिनिरूपानुगमसत्वा दृष्ट्वामे जो भावरूपत्वे तमसिरूप
त्वाप्रतीतिः। कर्मत्वेन्त्वा प्रतीतिश्च कथं अभावे रूपकर्मणोरभावादिस्य तथ्याहृतत्रेति। न मसो ऽतिरिक्तत्वे। तं नाव
व तन्त्रागभावादिकल्पना गौरवमतः आवश्यकताहृशा तेजो भावरूपत्वं सिद्धमितिसपि बोध्यं। मुक्तिसाधनीभूत
पदार्थतत्त्वज्ञानं लक्षणाज्ञानं श्वावयवतत्वं विभागोपयघते ऽनन्त्याद्रव्यत्वेनि। संयोगादिजनकतावच्छेदकतयाद्रव्य
ल त्वजातिसिद्धिरिति भावः। ननु लक्षणलस्यतावच्छेदकयोरभेदः स्यात्तथाहृ गुणवत्त्वमिति द्रव्यसामान्यलक्षण
मिति। एवं च सामान्यधर्माकथनेन न्यूनतापि नेति भावः। रूपरात्रयरहितधर्मस्यैव लक्षणत्वस्य वक्ष्यमाणत्वया
तज्ज्ञानं विशेषणीभूतरूपरात्रयरहितत्वज्ञानं विनानसंभवति रूपरात्रयरहितत्वज्ञानं तु विशिष्य रूपरात्रयज्ञा
नाधीनं अभावबुद्धेः प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य तन्त्रत्वादिसाशयेन रूपरात्रं यंप्रदर्शय

दीधि॰ प्र॰

५

नितस्यैकदेशावृत्तित्वमिति। तत्स्वरूपतावच्छेदकताभिमतसंबंधेनावच्छिन्नस्याधारनिरूपितत्वमर्थः। तस्यमात्रेति मात्रपदं कृत्स्नार्थ-
कं। संबंधविशेषावच्छिन्नत्वस्य वृत्तित्वसामान्याभावस्फोरकं। एकत्वापत्तेरिति। न चात्रालक्ष्यवृत्तित्वरूपातिव्याप्तेरपि स-
त्वात् संकर इति वाच्यं दुष्टसंकरेऽपि दोषासंकरादित्यर्थः। एतद्दूषणत्रयरहित इति उक्तदूषणाभावत्रयविशिष्ट इत्यर्थः। न
त्वसाधारणधर्मोऽन्तस्य शब्दावद्वितीयेति हि सिद्धांतः। तत्कथं तादृशदूषणत्रयपरिहितो धर्म इत्यत आह सत्येवेति। इत्युच्यत इति। अ-
भियुक्तैरिति शेषः। ननु साधारणत्वस्यालक्ष्यवृत्तित्वरूपतया तदभावरूपासाधारणत्वस्याव्याप्त्यादिदोषत्र-
स्तधर्मेऽपि सत्त्वात् कथं दोषत्रयपरिहितत्वं एवासाधारणधर्मत्वमाशंकां परिहरति असाधारणत्वमन्यादृशं निर्वक्ति-
लक्ष्यतावच्छेदकसमनियतत्वमिति। लक्ष्यतावच्छेदकव्यापकत्वे सति लक्ष्यतावच्छेदकव्याप्यत्वमित्यर्थः। अ-
व्याप्तिग्रहत्वस्य वारणाय सत्यंतं। अतिव्याप्तत्वस्य वारणाय विशेष्यं। धर्मपदं तु लक्षणताघटकसंबंधेन व्यापकता-

५

दिन्नात्पर्यग्राहकमिति भावः। अत्रेदं बोध्यं एते दोषाः असाधारणत्वस्य विघटकाः अतिव्याप्तौ व्याप्यत्वस्य इतरयोः अव्याप
कत्वस्य भग्नत्वे एतेषां दूषकताबीजं तु लक्षणेन इतरभेदसाधने। अतिव्याप्तौ व्यभिचारः इतरयोः अभागासिद्धिस्वरूपासि
द्धी इति। ननु लक्ष्यतावच्छेदकसमनियतत्वस्य लक्षणलक्षणत्वे लक्षणस्य व्यावृत्तिरेव प्रयोजनमिति मते व्याव
र्त्तकस्यैव तादृशलक्षणत्वस्य तत्पाव्यावृत्त्यादावतिव्याप्तिरिति मात्रांशाकांक्षतानुसारेणैव निराकरोति व्यावर्त्तकस्यैवे
ति। इतरभेदानुमितिजनकस्यैवेत्यर्थः। इतरभेदविधेयकानुमितिजनकतावच्छेदकविषयताविशेषाश्रयस्येति यावत्
त्। एवं च व्यावहारिकस्याप्यवच्छेदः। लक्षणत्वे। गवादिलक्षणत्वे। उक्तलक्षणलक्षणस्य स्वस्यैव स्यात्त्वमिति यावत्। लक्ष्य
लेइतिपाठेप्ययमेवार्थो बोध्यः। व्यावृत्ताविति। गवादीतरभेदो गोत्वादिरूपलक्ष्यतावच्छेदकसमनियतत्वस्य अ
भिधेयत्वप्रमेयत्वादौ पदार्थत्वसमनियतस्य अस्यत्वसत्त्वेनातिव्याप्तेर्वारणाय व्यावृत्तिभिन्नत्वमभिधेयत्वादिभिन्नत्वं

दीपि·प्र·
६

चलक्षणालक्षणो निवेशनीय इत्यर्थः। यद्यपि व्याप्तेरपि व्यभिचारिकत्वस्य वक्ष्यमाणानां तेनैव रूपेण सर्वेषां संग्र
हसंभवात्तद्व्याभिधानमनुचितं तथापि हेतुसाध्ययोरैक्ये हेतुमत्तानिश्चयकाले साध्यासंशयरूपपक्षतायाअ
सत्त्वेन नानुमितिरिति प्राचीनमते इतरभेदस्य व्यावर्तकत्वाभावेन तत्र नातिव्याप्तिः सिद्धावपि पक्षताविरहविशिष्टसिद्ध्य
भावः पक्षतेति शिरोमणिमते तु व्याप्तेरपि व्यावर्तकत्वेन लक्ष्यतया न तत्र लक्षणासंगमनस्यैव त्वेन नातिव्याप्ति
रित्याबेदपि नु पक्षकथनमिति ध्येयं। ननु किमिदं नाम लक्षणालक्षणालक्ष्यतावच्छेदकत्वापावर्तकत्वं। न तावत्सामा
न्यतो भेदानुमापकत्वं। व्याहत्यभिधेयत्वादेरपि यत्किंचिदुभयत्वावच्छिन्नप्रतियोगिताकभेदानुमापकत्वेन
लक्षणालक्षणालक्ष्यतया तत्रापि व्याप्तिकथनासंगतेः सर्वेषामपि व्यतिरेकिधर्माणां यत्किंचिद्व्यावर्तकत्वात्।
साधारणपदघटकव्यापकत्वादिवैयर्थ्यापाताच्च। नापि विशिष्यतत्तद्धर्मावच्छिन्नेतरभेदानुमापकत्वं। तथा सति गो

६

तावच्छिन्नेतरभेदानुमापकस्य पृथ्वीत्वादिमत्वस्य गोत्वसमनियतत्वं लक्षणाभिमतं पूर्वरीत्या विशिष्य तत्तल्लक्षणस्य तत्त्
स्य तत्तयागोत्वादिरूपत्वस्य तदवच्छेदकत्वं तद्धर्मसमनैयत्यं सम्यगो तावच्छिन्नेतरभेदादिरूपव्यावर्त्तोस्य त्वेनातिव्याप्ते
: संभवेप्यभिधेयत्वादावतिव्याप्त्यलक्षणतापत्तेर्दुर्वारत्वात् गोत्वादिसमनैयत्यस्य तत्त्वासत्वादिति चेन्नैवं यतः सा
स्नादिमत्वे पक्षीकृते गोत्वावच्छिन्नेतरभेदानुमापकत्वे साध्ये विशेषव्याप्त्या वन्वयदृष्टान्तालाभेन यत्तद्धर्मसम
नियतत्वं तद्धर्मावच्छिन्नव्यावर्त्तकधर्मान्तरीत्यासामान्यमुखव्याप्तेरनुपपन्नत्वात् तत्र सिद्धसाधनाप्रसिद्ध्याव्या
वर्त्तकयोर्व्याहत्याभिधेयत्वयोः तत्तद्धर्मसमनैयत्यस्य तद्रूपप्रकारकनिरूपितत्वे हेतुत्वस्यैवेहेतोः सत्वेन प्रकृतसाध्यस्य तत्तुल्यस्य वा सा
ध्यस्यासत्वेन व्यभिचारः स्यादतस्तद्दोषवारणाय तत्तद्धर्मावच्छिन्नेतरभेदरूपव्यावृत्तिभिन्नत्वमभिधेयत्वादिभिन्न
त्वं च तादृशलक्षणो निवेशनीयमित्यभिप्रायकोऽयं ग्रंथस्तेन न पूर्वोक्तदोषावसरः अधिकविचारस्त्वन्यत्रानुसंधेयः।

दीपि. प्र

लक्षणस्य व्यवहारोपि प्रयोजनं येन रूपेण व्यवहर्त्तव्यता तेन विना तद्रूपावच्छिन्नबोधकशब्दरूपव्यवहारासंभवात् नन्वेवं
च व्यावहारिकलक्षणस्यापि लक्ष्यतातद्भिन्नत्वविशेषणं न देयमित्याह व्यवहारस्यापीति। ननु व्यावृत्ताति व्याप्ति
वारणाय तद्भिन्नत्वमावश्यकं व्यावृत्ते व्यावहारिकत्वाभावादितत्रमवारयति व्यावृत्तेरपीति। अपि नाभिधेयत्वा
दिपरिग्रहः। दृष्टान्ताभावाय॥ ननु आद्यक्षणावच्छिन्ने द्रव्ये गुणवत्त्वस्यासत्त्वेपि कालान्तरावच्छिन्नेन तत्तस्
त्वमक्षतमेवं च गुणाश्रयत्वं लक्षणं साधीयः मतमत्रास्त्वग्रे विशेषेति। पारद्याद्व्यारंभकसंयोगजनकक्रिया
स्पत्तिं न नीपक्षेतो। वयं वात्तरे तादृशसंयोगनाशिकाक्रिया जाता तादृशद्रव्यस्पर्श। नवीनाः। पुनरसमवायि
कारणस्य कार्यसहभावे न कारणत्वमस्मवलंब्यो स्पत्तिविनष्टं नाणी कुर्वंति। गुणादावतिव्याप्तिवारणाय गुणास
मानाधिकरणेति जातिविशेषग्रहणं। सत्तामादायातिव्याप्तेर्वारणाय समवायिनेति। द्रव्यगुणान्यतरत्वमादायाति

आपेक्षीरस्तापजातीतिसमवायेनतादृशार्थमेवत्वमतान्यपंग्राह्यकं अतःकालिकादिसंबंधेनतद्वत्त्वमादायना
तिव्याप्तिरितिभावमप्रिंउक्तविवक्षयाःआपिवारणोपिएकार्थसमवायादेवेति।एकस्मिन्नर्थेसमवायेन
सत्तादेवेसर्थः।गुणानंगीकारादिति।तथावक्तमेनसमवायघटितसामानाधिकरण्यनैवगुणेगुणक्ता
ऽप्रवलाप्यक्तेतिनत्राक्तमगुणवत्वकल्पनंनसंभवतिगौरवादितिभावः।सामान्यवानिति।सामान्यवत्वंस
मवायेनवोध्यंतेननकालिकसंबंधेनतद्वतिव्याप्तिः।गुणाशीतलक्ष्यनिर्देशः।लाघवासदाहगुण
जातिमान्वेति।यद्यपिलक्ष्यतालक्ष्यतावच्छेदकद्वारमेरःनथाविलक्षणेनतराभेदेसाध्ये हेतौसाध्यसामानाधि
करण्यनिश्चयेपिहेतुधर्मितावच्छेदकसाध्यनिश्चयस्यानियमेनलाभिप्रायेणोदमितिसंक्षेपः।एवमग्रेपि
बोध्यं।गुणत्वजातिसिद्धिस्तुगुणपदशक्यतावच्छेदकतयेतिगुणादीधितौभट्टाचार्याः।नचैवंविभुपदशक्यता

दी.पि.प्र

८

वं चेदेकतया विभुत्वमपि नानिःसिध्येदिति वाच्यं। मूलत्वं संकरस्य बाधकस्य सत्वे नैनं तथा चोक्तं द्रव्यकिरणावल्यामुद
यनाचार्यैः। व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः। रूपहानिरसंबंधो जातिबाधकसंग्रहः। व्यक्तेरभेदः स्वाश्रयव्य
क्तेरैक्यं आकाशत्वादिर्जातित्वे बाधकं। व्यक्तेस्तुल्यत्वं अन्यूनानतिरिक्तव्यक्तिकत्वं घटत्वकलशत्वयोर्भिन्नजातित्वे
संकरः परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्रसमावेशः भूतत्वमूर्तत्वादेर्जातित्वे। अनवस्था जातेर्जा
तिमत्वे। रूपहानिः। स्वतो व्यावर्तकत्वात्मकरूपस्य हानिः विशेषस्य जातिमत्वे। असंबंधः प्रतियोगितानुयोगि
तान्यतरसंबंधेन संबंधाभावः। अभावादेर्जातिमत्वे इति संक्षेपः। लघुत्वादीनामासामस्तिकत्वेपि कमेद्यं तर्भावो
न्याप्य इति समाधने लघुत्वस्येति। संयोगासमवायिकारणे संयोगेति व्यभिचारवारणाय संयोगभिन्नत्वे सती
ति। संयोगसमवायिकारणाद्रव्ये इति व्याप्तिवारणाय असमवायीति। अपसरणादेरित्यादिना रेचनस्पंदनोर्ध्वज्व ८

त्वनिर्वचनानां संग्रहः । गमनेनान्तर्भावादिति । नचोत्क्षेपणादीनामपि गमनेनभावोस्त्विति शंकनीयं । स्वतंत्रे
च्छस्यनियोगपर्यनुयोगानर्हत्स्य ऋषेः संमतत्वादिति भावः । परत्वमित्यादि । लक्षणमग्रेस्फुटं नस्फुटैवव्यस्यपतरति
नस्फुटत्वेति ध्येयं । सत्तायाः द्रव्यत्वाद्यपेक्षयाधिकदेशवृत्तित्वेन परत्वमेवघटत्वादीनांन्यूनवृत्तित्वेनापरत्व
मेवद्रव्यत्वादीनां सत्तातो । परत्वं घटत्वादितः परत्वमिति विवेकः । समवायस्य भेदो नास्तीति । नचसमवायस्या
भेदे स्पर्शसमवायवति वायौ रूपवत्ताप्रतीतिः स्यादिति शंक्यं । रूपसमवायसत्वेपि रूपाभावेन न तथाप्रतीतेरभा
वादितिदिक् । पृथिवीलक्षणस्याप्यव्याप्तिमाह नत्वेति । पृथिव्यादिषु मधुरसत्वं ॥ गंधसमवायिकारणता
वच्छेदकतयापृथिवीत्वजातिसिद्धिरितिबोध्यं । नात्वेति । अत्रनतीयार्थो भेदः संकीर्तनपदार्थप्रतिपादक
शब्दे । न्वेति । तथाचवस्तुप्रतिपादकनाममात्रमुद्देशइति लक्षणोपपर्यवस्यति । अत्रघटइतिपदे । तिव्याप्तिवा

दीपि. प्र.

२

रागायवत्त्वपरं लक्षणीयवत्त्वपरं । लक्षणीयस्य पृथिव्यादेः सामान्यतः प्रतिपादके प्रमेयपदे इति व्यभिचारवारणा
य नामपदं लक्ष्यतावच्छेदकावच्छिन्नपरं । लक्षणवाक्ये नामसत्त्वादिति व्याप्तिरनोमात्रपरमिति ध्येयं । आरब्धे ।
त्वम्ये । परस्परविरोधेनेति । सुरभिगंधं प्रमसुरभिगंधस्यासुरभिगंधं प्रति सुरभिगंधस्य प्रति वंधकत्वेनेत्यर्थः । प्र
तीत्यनुपपत्तिरिति । अतश्चित्रगंध एवाम्प्रतिबद्धः स्वीकर्तव्य इति भावः । अवयवगंधस्यैवेति । स्यादेतत् समवे
तत्वसंबंधेनेत्यादिः । तुच्छत्वं तु दुर्गंधरतिन्यायेनाणीहत्याहर्किलेति । जलत्वादिकमादायाति व्याप्तेर्वारणाय गंधस
मानाधिकरणेति । सत्तावारणाय द्रव्यत्वापेक्षेति द्रव्यत्वन्यूनत्वे सति स्पर्शवत्त्वेन द्रव्यत्वव्युदासः । गंधवतीत्येवेति सु
रभिजलमित्यादिप्रतीतेरित्यर्थः । पृथिवीगंधस्यैवेति । एतावता तच्च संयुक्तत्वसंबंधेनेत्यादिः । तत्र । जलत्वादौ । यद्य
भूतमात्रीहीक भूतमात्रकेनेनतु तथापि विभुत्वनुगतरूपेण लक्षणतावच्छेदकसंबंधाननिवेशे कालादावतिव्याप्ति

वारयति सर्वाधारत्वेनेति तन्नु ननु समवायादीनां समवायत्वादिनैव संसर्गेन याते नैवरूपेण नन्तेवेधस्यानन्तत्वप्रस
ङ्गाद्गौरवं कर्तव्योध्य। नित्यपृथिवीत्वादिरूपलक्षणगतनित्यत्वादिप्रदर्शयति नित्यत्वमिति प्रकारान्तरेणेति। पृथि
वीमिमनुपद्यते अत्र नित्यपृथिव्याः शरीरेंद्रियभिन्नत्वरूपविषयलक्षणाक्रान्तत्वेन विषयान्तर्गतत्वमिति पृ
थिव्याः त्रिविधत्वमनएव मूले पुनस्त्रिविधेत्युक्तिः संगच्छते इति ध्येयं। केचित्तु अनित्यपृथिव्या एव त्रैविध्यं व
र्णयंति। उद्देशक्रमानुसारेणाग्रे यथमं शरीरलक्षणमाह आत्मन इति। आपतनं। अवच्छेदके। तत्र चायमा
शं लक्षणं संपन्नं तादृशमात्मपदवच्छिन्नरति। सुखदुःखान्यतरसाक्षात्कारावच्छेदकमिति यावत्। अत्रा
त्मावयवित्वे सतीति विशेषणं देयं। तेन पादादीनामवच्छेदकत्वेपि तस्य नातिव्याप्तिः। शरीरत्वं तु जातिः
पृथिवीत्वादिना संकरान्नतथेंद्रियत्वं न जातिरित्याशयेनाह शरीरे तत्तोऽभूनेति। आत्मादावतिव्याप्तिवारणा

यस्संते। श्रोत्रेः व्यभिचारवारणाय शब्देतरेति। चक्षुरादौ विशेषगुणस्यानुद्भूतरूपादेः सत्वेनाव्याप्तेर्वारणायोद्भूतेति।
नुद्भूतत्वं न जातिः शुक्लत्वादिना संकरात् न तु न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं वायुस्पर्शादावुद्भूतरूपत्वादिना
कारणत्वानुपपत्तेः। किन्तु चक्षुः शुक्लत्वादिव्याप्यमनुद्भूतत्वं नानानतत्तदभावकूटवत्त्वमेवोद्भूतत्वं तच्च संयोगादावपि तथा
च शब्देतरोद्भूतगुणासंयोगमादायासंभवस्य वारणाय विशेषेति। कालादावतिव्याप्तिवारणाय विशेष्यदलं। तत्रैवा
तिव्याप्तिवारणाय ज्ञानकारणेति। प्राचीनमते विषयावयवेन्द्रियावयवसंयोगस्य प्रत्यक्षजनकतया तदाश्रयस्य
द्रियावयवस्य नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतयारतौ भूतवृक्षस्संयोगाश्रयस्य कालादेश्च
वारणाय मनःपदं। नन्वात्मान्यत्वे सतीत्यनेनैवात्मन्यतिव्याप्तिवारणसंभवे किं गुरुतरशब्देतरेत्यादिविशेषणेने
निवाच्यं तथा सति च मेमनस्संयोगस्य ज्ञानमात्रं प्रतिहेतुत्वमते न व्याप्तिव्याप्तेः स्थलविस्तरेण। एवं चेति। तत्तदर्थस्य

+ चक्षुरादेर्गंधग्राहकमिति उत्तरत्र। उत्तरेत्र। इंद्रियं रसग्राहकमित्यादौ। शीतस्पर्शसमानाधिकरणो। अत्र विशेषणं [illegible]

शरीरादिसामान्यलक्षणत्वं चेत्यर्थः। ननु गंधवत्त्वप्रवेशे नैवतल्लक्षणस्य सामंजस्ये गंधग्राहकत्वनिवेशनमनुचितमेवं
वइंद्रियं गंधग्राहकमिति मूलमनुपपन्नमित्याशंकां परिजिहीर्षुस्तन्मूलं तत्प्रयोजनकथनपरतयावारी त्योह। जलत्व
जातिसिद्धिस्तु स्नेहजनकतावच्छेदकतयेति ध्येयः। अन्यत्सर्वं पूर्ववदित्येति। नित्यत्वादिकं जलशरीरादिलक्षणान्यगंधवत्त्वस्या
ने शीतस्पर्शवत्त्वं निवेश्य पृथिवीनिरूपणोक्तरीत्यावत्यर्थः। एवमग्रेप्यूह्यं। मूले अविंधनमिति। आप एवेंधनमुद्दीपनं
यस्य तदित्यर्थः। भुक्तस्येति। भुक्तस्यौदनादेः परिणामः परिपाकः तत्र हेतुरित्यर्थः। आकरजमिति। आकरः खनिः त
त्र जातमित्यर्थः। सुवर्णस्य तैजसत्वं व्यवस्थापयितुं शंकते दीपिकायां नन्विति। पार्थिवत्वसाधकं पीतत्वे हेमगुरुत्वा
तैजसत्वाभावसाधकं हेतुमाह गुरुत्वादिति। एतेन सुवर्णरूपं तेजसि विजातीयपीतरूपं स्वीक्रियते पीतं सुव
र्णमित्यबाधितप्रत्यक्षप्रतीतिबलात्। एवं च तैजसस्य वस्यानिर्बाधतया पृथिवीत्वं न सिध्यतीति कस्यचिच्छंकातिनिर
[illegible]

श्री

दीपि॰प्र॰ स्त्वा॰ गुरुत्वस्याप्रत्यक्षत्वेन तथा वक्तुमशक्यत्वादित्यतिरिक्त। सुवर्णस्यापीति प्रागुरुत्वाश्रयतो ऽतिरिक्तत्वं व्यवस्थापयिष्य
११ न् वक्ष्यमाणानुमाने ऽप्रयोजकत्वशंकावारणार्थं कारणाभावमनुकूलतर्कं व्यवस्थापयति। अत्यंतानलेति। सुवर्ण
स्येत्यादि। अनुमानप्रयोगस्त्विममवसेयः सुवर्णमपार्थिवं असति प्रतिबंधके ऽत्यंतानलसंयोगे सत्यनुच्छिद्यमा
नद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा पृथिवी जलमध्यस्थघृतादौ व्यभिचारवारणाय असति प्रतिबंधक इति॰ अग्नि
संयोगासमानाधिकरणद्रवत्वविनाशादौ व्यभिचारवारणाय अत्यंतानलसंयोगे सतीति। द्रुतद्रव्यांतरसिद्धावि ति
। अत्यंतानलसंयोगेपीति मा अयं द्रवत्वनाशप्रतिबंधकद्रवद्रव्यांतरसंयुक्तः। अत्यंतानलसंयोगेप्यनुच्छि
घमानद्रवत्वाधिकरणत्वे सति गुरुत्वात् जलमाध्यस्थघृतवदित्यनुमानेन तत्सिद्धिः ईदृक्याजलादिकमादाया
नुमानपर्यवसाने वारयति नैमित्तिके ति। ननु रूपस्पर्शभास्वररूपयोरुपलब्ध्यभावेन सुवर्णस्य तैजसत्वमनु ११

पपक्षमित्यत आह तस्येति। प्रतिबंधादिति। दोषविशेषेत्यादिः। शरीरेतीति। तथा च प्राणस्य विषयेंतर्भाव इति भावः
।स्थानभेदादिति। हृदि प्राणस्य रमादिकोशोक्तस्थानभेदादित्यर्थः। स्वमतं दर्शयति स्पर्शानुमेय इति। अस्य। उपल
भ्यमानस्पर्शस्य। आश्रयः पृथिवीन चेत्यन्वयः। चतुष्टयमिति। इदमाकाशादिषु स्वेकभेदसाधनाभिप्रायेण। सर्व
त्रोपनयिप्रसंगादिति। स्पर्शस्येत्यादिः। आकाशादीनां विभुत्वादिति भावः। प्रत्यक्षः। बहिरिंद्रियजन्यप्रत्यक्षविष
यः। अनुद्भूतस्पर्शाश्रये त्वगिंद्रियेव्यभिचारवारणाय प्रत्यक्षेति। उपाधित्वादिति। तथा च हेतावुपाधिव्यभिचा
रेण साध्यव्यभिचारोन्नयनसंभवान्नप्रत्यक्षत्वसिद्धिरिति भावः। ननु तादृशप्रत्यक्षत्वस्य गुणादावपि सत्वेन त
त्रोद्भूतरूपाभावेन साध्याव्यापकत्वात्कथं तस्योपाधित्वमित्यत आह यत्रेत्यादि। तथा च पक्षधर्मावच्छिन्नसाध्य
व्यापकोऽयमुपाधिरिति भावः। एवं च प्रत्यक्षस्पर्शाश्रयस्याप्युद्भूतरूपाभावेन प्रत्यक्षत्वानंगीकारे। अप्रत्यक्षत्वा

दीपि·प्र· पत्तिः।।नत्रोऽभू नरूपाभावादिति भावः।।ननु परमाणुपुंजस्यैव घटादिरूपत्वेनातिरिक्तावयविनोऽसत्वात्पृथि मा वै प १
व्यादिचतुष्टयस्य नित्यानित्यत्वाभ्यां विभागकथनमनुपपन्नमित्याशंकां वारयति रदानीमिति।पृथिव्या
१२ दिभावः।।चाक्षुषद्रव्यत्वादिति।।चाक्षुषत्वे सति द्रव्यत्वादित्यर्थः।रूपादावात्मनि च व्यभिचारवारणाय वि
शेष्यविशेषणे।।न चेदमप्रयोजकमिति शंक्यं त्र्यणुकं प्रति कारणतया महत्त्वस्य तदवयवे सिद्धत्वेन तयासा
वयवत्वं विना।।वयवसंख्याजन्यस्य तस्यासी कर्तुमशक्यत्वादिति संक्षेपः।।यत्किंचिद्द्रव्यध्वंसस्येदानीम
पिसत्वात् सर्वेति।।नित्यद्रव्याणां ध्वंसासंभवात्कार्येति परमाणुनिष्ठरूपादीनां नदानीमपि सत्वात्तद
प्येति।।ध्वंसानां ध्वंसासंभवेन महाप्रलयेऽपि सत्वात्तन्नभावेनीति दिक्।।शब्दगुणकमिति।।शब्दवदिति च
त्कव्येन याकथनमाकाशोज्ञाद्दरवविशेषणमिति सूचनाय घटाकाशो मठाकाश इत्यादिव्यवहारस्यौपा १२

+ त्मकतया परमाणोरणुतरत्वेन द्व्यणुकपरिमाणापेक्षया परमाणुपरिमाणस्यापकृष्टत्वात्

धिकृतत्वेनासाधकत्वादाकाशस्यानेकत्वेप्रमाणाभावमाह एक इति। एकत्वादिति। आकाशस्येत्यादिः। नन्वे
कत्वेप्यविभुत्वमस्त्वत आह सर्वत्रेति। सर्वदिगवच्छेदेनेत्यर्थः। परिच्छिन्नपरिमाणवत्त्वमिति। यद्यपि
रिच्छिन्नत्वस्यापकर्षाश्रयत्वाभावात्परमाणुष्वव्याप्तमिदं लक्षणमित्यस्वरसेन द्वाप्याह क्रियावत्त्वमिति
। वस्तुतस्तु लाघवमेवोत्तरकल्पानुसरणबीजमिति ध्येयं। अतीतादिव्यवहारहेतुः। काल इति मूले आदि
ना ऽनागतादिपरिग्रहः। अतीतत्वं वर्तमानध्वंसप्रतियोगित्वं वर्तमानत्वमिह शब्दप्रयोगाधिकरणका
लवृत्तित्वं। भविष्यत्वं च वर्तमानप्रागभावप्रतियोगित्वं। अत्र सर्वत्र कालस्य घटकतया शब्दप्रयोगरूपा
तीतादिव्यवहारहेतुत्वं तस्येति ध्येयं। ननु तादृशव्यवहारः सूर्यपरिस्पन्दादिरूपोपाधिमादायापि संभ
वतीति वाच्यं अनुगतव्यवहारस्यानुगतविषयं विना। संभवेनातिरिक्तकालसिद्धेः कालादिनिरूपक। सर्वाधा

दी·पि·प्र
१२

रद्वृत्ति। कालिकसंबंधेनेत्यादिः। अत्र विभिन्नकालिकयोराधाराधेयभावविरहान्न क्रियादेः सर्वाधारत्वशंकैव नावत
रतीति भावः। प्राच्यादिव्यवहारहेतुरिति मूले आदिना प्रतीच्यादिपरिग्रहः। उदयाचलसंनिहितमूर्तावच्छिन्ना दिक्
प्राची। तद्व्यवहितमूर्तावच्छिन्ना च प्रतीची। मेरुसंनिहितमूर्तावच्छिन्ना दिगुदीची। तद्व्यवहितमूर्तावच्छिन्ना तु
दक्षिणा। ज्ञानाधिकरणमिति। समवायेन ज्ञानवदित्यर्थः। तत्रात्मनोर्मध्ये। दीपिकायां नित्यज्ञानाधिकरण
त्वमिति। न च नित्यं विज्ञानमानंदं ब्रह्मेति श्रुत्या विरोध इति वाच्यं आनंदपदस्य आनंदवदर्थकत्वात् यथा स्वविज्ञा
नपदस्यापि विज्ञानवदर्थकत्वात् स्वीकारेण विरोधात् न चानंदपदस्यैतादृशार्थकत्वमसिद्धमिति वाच्यं
अर्शआद्यजंतत्वांगीकारेणैतादृशार्थसिद्धेः अन्यथा नपुंसकत्वानुपपत्तेः अत्रानंदो मारायगमे सुखीसं
हृतो हमितिवन्न दुःखाभावेऽपचर्यते। नवीनास्तु नित्यसुखमीश्वरस्यांगीकुर्वंतीत्यलमधिकजल्पनेन। १३

२७५

+ आत्मसुखादिव्यक्तिरिति ॥ विजातीयात्मनः संयोगादिरूपस्य मानसप्रत्यक्षहेतोः शरीरेऽभा

रूपिद्रव्यत्वादिति । वायुप्रत्यक्षं प्रत्युद्भूतरूपस्पर्शहेतुत्वादिति भावः ॥ प्रमाणत्वादिति । नन्विदमप्रयोजकमिति शंकां
· कार्यत्वावच्छिन्नं प्रति कृतित्वावच्छिन्नस्य हेतुत्वे नाप्रयोजकत्वाभावादिति कृ उपादानगोचरेति । यद्यपि कर्तृत्वं कृतिम
त्वमेव संभवति तथापरोक्षज्ञानादेः चिकीर्षादिकं प्रति कारणत्वप्रदर्शनाय जन्यो नित्येति ध्वौं सर्वविदिति । वि
द्वयालर्थः विशेषरूपेणाज्ञानं । लक्षणमाहेति । स्वरूपमाहेत्यर्थः प्रतिजीवं प्रतिशरीरं भिन्न इति · नन्वेवमपवाय
चयापचयाभ्यां तत्तच्छैशवादिशरीराणां भिन्नत्वेऽपि जीवभेदाभावादिदमसंगतं एवं कायव्यूहस्थलेऽपीति वासं
समानकालिकयोगजधर्मजन्यानेकशरीरभेदेन जीवभेदस्यैवाविवक्षितत्वेनादोषात् एवं चैतच्छरीरावच्छिन्नभो
वा. १ गसमानकालिकयोगाद्यजन्यशरीरावच्छिन्नभोगवद्भिन्नत्वं शरीराँ प्रति शरीरं जीवभेदः साध्यत्वं लं । श
रीरस्यैवेति । अन्यथा मनुष्यत्वादीनां शरीरधर्मत्वेन तथाप्रत्यक्षस्यैवासंगतिरित्यभिमानः । नाशापत्तेरिति ।

६२

दी॰पि॰प्र॰
२८

समवायिकारणनाशस्य द्रव्यनाशकत्वादिति भावः। सोऽहमिति कालिकभिन्नदर्शनवति वर्त्तमानकालिकस्पार्शनवत्व
प्रत्याप्यनेनत्वभवतां मतेन संभवति वा ह्युभयस्पार्शनवतोर्भेदादिति भावः। अनुसंधानायोगादिति। अन्यथा चैत्रेणा
नुभूतस्य वस्तुनो मैत्रेण स्मरणापत्तेरिति भावः। ननु सर्वशरीरावच्छेदेनात्मनि सुखादिसाक्षात्कारोपपत्तये स
र्वशरीरव्यापित्वमात्मनोऽस्तु तथापि विभुत्वांगीकारे प्रयोजनाभावइत्याशयेन शंकते नमध्यमेति। अनि
त्यत्वप्रसंगेनेति। यन्मध्यमपरिमाणं तदनित्यमिति व्याप्तेरिति भावः। कृतेति। कृतस्य यागादिनासंयादि
तस्य धर्मादेः हानं नाशः अकृतस्याभ्यागमः प्राप्तिः। तत्प्रसंगादित्यर्थः। कर्त्तुरात्मन उत्तरजन्मन्यसत्वा
त् अकर्त्तुश्च सत्वादिति भावः। ननु जीवस्याणुत्वमवास्तां तावता नोक्तदोषः। सूक्ष्मस्य दीपस्य सर्वगृहा
वच्छेदेनेवाणुरूपस्यापि जीवस्य सर्वशरीरावच्छेदेन प्रभाप्रसरणाधिकारादिति चेन्न तत्यासत्तिकायव्यूह २८

स्थलेऽस्वादिसाक्षात्कारानुपपत्तेरितिदिक् ।मनस्संयोगाद्यनित्याभिवारकेंद्रियत्वघटितनयनुलोमलक्षणापेक्षयाल
घुलक्षणमाह स्पर्शरहितत्वे सतीति ।एकैकमनइति ।सर्वात्मनामेकस्यमनसः स्वीकारे एकस्यज्ञानदशायामपरस्यत
दनुपपत्तिः तस्याणुत्वेन सकलेंद्रियैरेकदासंयोगाभावादितिभावः ।विभ्विति ।नचायंतस्यपरममहत्त्वपरिमाणव
त्वे नपूर्वोक्तदोषानवकाश इतिभावः ।अभावादिति विभुद्वयसंयोगानभ्युपगमादितिभावः ।ज्ञानानुत्पत्तीति ।भा
वकार्यस्यासमवायिकारणजन्यत्वनियमादितिभावः ।विभुद्वयसंयोगोऽस्त्विति ।तस्यनित्यत्वेनासमवायिका
रणक्रियायाअसत्त्वेपि नक्षतिरितिभावः ।मात्रपदमिति ।यद्यपि चक्षुर्मात्रग्राह्यत्वं चक्षुरितरग्राह्यत्वे सति चक्षुर्ग्रा
ह्यत्वं तच्च नरूपे संभवति तथापि त्वगिंद्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं तदिति ध्येयं ।गुणपदमिति ।नचैवमपिप्रभा
भित्तिसंयोगेऽतिव्याप्तिरिति वाच्यं त्वगग्राह्यचक्षुर्ग्राह्यगुणविभाजकधर्मवत्त्वपर्यवसानेनादोषात् अतएवन

परमाणुरूपादावव्याप्तिरिति वाच्यं। सकलरूप एवेति। एकोवैरेणातिरिक्तचित्ररूपस्यावच्छेदः। व्याप्यवृत्तित्वेति। दैशिकव्या
प्यवृत्तित्वेत्यर्थः। इदमुपलक्षणं। एकैकावचित्ररूपस्थले। नेकरूपाणामेवैकैकत्वत्यागभावादिरूपलेख्यानेकप्रागभावादी
नां कल्पनेनानेकरूपेषु चित्रत्वाकारकप्रतीतिविषयत्वकल्पनेन च गौरवमिति। रूपपरिहितत्वेनेति। समवायेनेत्यादिः
प्रसंगादिति। द्रव्यचाक्षुषं प्रति समवायेनैव रूपस्य कारणत्वादिति भावः। रूपवत्समवेतत्व। स्वाश्रयसमवेतत्वसंबंधेन
रूपं। प्रत्यक्षत्वप्रयोजकमिति। प्रत्यक्षविषयत्वप्रयोजकमस्तीत्यर्थः। गौरवादिति। साक्षात्संबंधेन कारणत्वापेक्षया
गौरवादित्यर्थः। चित्रावयवकपालेनारब्धघटस्य चाक्षुषत्वानुरोधेन स्वसमवायिसमवेतसमवेतसमवेतत्वसंबंधेनै
व रूपस्य तत्प्रयोजकत्वमंगीकर्तव्यं एवं च त्रुटेश्चाक्षुषानुपपत्तिरपि दुर्वारा। प्रत्यक्षत्वानुपपत्त्येति। एतेन चित्ररूप
वदितरस्यापि सिध्येदिति शंका निरस्ता। द्व्यणुकलौकिकरासनस्याप्रसिध्या तदनुपपत्त्यभावेन चित्ररसासिद्धेरिति संक्षेपः।

४ परमाणुषु रूपांतरोत्पत्ताविष्टान्वयः॥ तत्र। परमाणुरूपे। अवयविनिपाकांगीकारादाह। का
रसत्वेत्यारभ्य गुणविभाजकोपाधिमत्वेनान्वयः। एवं गंधत्वस्पर्शोऽपि। मात्रपदमिति। यद्रूपस्पर्शाद्यन्यतमं इत्यन्य
द्यगुणविभाजकोपाधिमत्वमिति तु फलितार्थः। परमाणुष्वेव पाक इति। परमाणौ घटे तत्पूर्वरूपपराहत्यादिजनक
तेजःसंयोग इत्यर्थः। एवकारव्यवच्छेद्यं स्फुटयति न द्व्यणुकादाविति। आमनिक्षिप्ते घट इति। घटे आमनिक्षिप्ते सति
श्यामघटनाशेऽवयविकारणामयमाशयः वेगातिशयवशात् तेजसा परमाणूनामभिघातसंयोगे समनन्तरं नोदनेषु क्रिया
जायते ततो विभागः ततआरम्भकसंयोगनाशो ततः श्यामद्व्यणुकादिनाशः ततः स्वतंत्रेषु परमाणुषु रूपान्तरोत्प
त्तौ पुनरदृष्टवदात्मसंयोगात् सामग्रीवशात्परमाणुषु क्रियाविभागादिक्रमेण पर्यवस्थितमहावयविपर्यन्तमुत्पत्तिरिति
। अवयविन्यपि पाकं वदतां नैयायिकानां त्वयमाशयः तेजसा परमाणूनामभिघातसंयोगेऽपि न सर्वनियमतः आ
रंभकसंयोगप्रतिद्वंद्विविभागजनकक्रियाजनकत्वमानाभावेनावयविन्यपि पाकस्वीकार उचितः। अत एव सोऽयं

दी.वि.प्र. इति प्रत्यभिज्ञा संगच्छते। अनंतावयविनाशाद्युत्पादकल्पनेन न लाघवं चेति। न चावयविरूपं प्रति अवयवस्य पतनाश
२६ प्रमाश्रयनाशस्य च हेतुतायां व्यभिचार इति वाच्यं कार्यतावच्छेदककोटौ वैजात्यनिवेशनेन न व्यभिचारवारणासं
भवात्। जलादिविस्तैर्यर्थ इति। यद्यपि रूपादिश्चतुष्टयं जलादौ बाधितं तथापि यथायोग्यमन्वेतव्यं स्वयं उद्भूतत्व
मिति। उद्भूतत्वं जातिः। न च शुक्लत्वादिना सांकर्यं गुणगतसांकर्यं न बाधकमिति नवीनमताभिप्रायकोऽयं ग्रंथ इति
न दोषः। केचित्तु शुक्लत्वव्याप्यमनुद्भूतत्वं नानाजातिस्वभावकूटवत्त्वमेवोद्भूतत्वमित्याहुः। मूले हि तत्स्विकं सर्वेवानि
त्यमेवेति। हेतुभूतापेक्षाबुद्धिनाशेन द्वित्वनाशादिति भावः। परिमाणाद्युत्पत्तिबोधकशब्दे। विभजनमसंग
तमनो दीपिकायां भावप्रधान इति। असाधारणेतीति। कालादेः साधारणकारणत्वेन तत्रैवातिव्याप्तिरिति
तिभाकाऽऽस्वास्तताभावेत्ति। स्वप्रतियोगित्वस्वसामानाधिकरण्योभयसंबंधेनाभाववत्त्वमिति तु निष्कर्षः। २६

संयोगनाशकगुणेनि तावन्मात्रे तथापि संयोगेऽतिव्याप्तिः तस्य प्रतियोगिविधया नाशं प्रति कारणत्वादितिवाच्यं प्रतियो
गितासंबंधावच्छिन्ननाशनिष्ठजन्यतानिरूपितजनकत्वविवक्षणे नादोषादिति केचित् । परे तु संयोगनाशत्वा
वच्छिन्ननिरूपितसमवायावच्छिन्नकारणत्वमिति निष्कर्षः । एतत्तात्पर्यमाहकं गुणपदमित्याहु विभाग इति । अ
यमप्यव्याप्तं निरीतितो ध्वंसे आद्यतेति । आद्यत्वमिह स्वसमानाधिकरणपतनप्रतियोगिकध्वंससमानकालि
कत्वं । द्वितीयपतनादीनां प्राथमिकपतनध्वंससमानकालिकत्वान्निरास इति भावः । नदाहेति । नैमित्तिकमाह स
र्थः । पिंडीभावेतीति पिंडीभावः संयोगविशेषः । भेरीदंडसंयोगजन्य इति । आद्यः समवायिकारणं भेर्याकाशसंयो
गः निमित्तकारणं तु भेरीदंडसंयोगः । द्वितीये वंशदलाकाशविभागः समवायिकारणं । दलद्वयविभागो निमित्त
कारणं । तृतीये तु पूर्वपूर्वशब्दः असमवायिकारणं पवनादिः निमित्तकारणमिति विवेकः । जानामीत्यादि । ज्ञान

दी॰प्र॰ त्वमोत्रे लक्षणं जानामीत्यनुव्यवसायगम्यत्वं तु ज्ञानत्वस्य प्रमाणासिद्धत्वमत्वनायतथाहि घटं जानामीत्याद्यनुगता
१८ नुव्यवसायस्यानुगतधर्ममंतरानुपपन्नत्वेन तत्स्वीकर्तव्यत्वे तथा लाघवाज्ज्ञानत्वसिद्धिः अयं च मूले सर्वव्यवहार
हेतुरित्यादेः स्वरूपकथनमिति भावः। संस्कारस्य त्रिविधत्वादाह भावनाख्य इति। प्रत्यभिज्ञायां मत्त्वा प्रीति। सो
यं देवदत्त इत्याद्याकारकप्रत्यभिज्ञायां तत्त्वे देशकालत्वानित्वरूपतत्तासंस्कारजन्यतस्य सत्वेन तत्रातिव्याप्तिरिति भा
वः। मात्रेतीति। यद्यपि संस्कारमात्रजन्यत्वं संस्कारेतराजन्यत्वे सति संस्कारजन्यत्वं तद्यत्वं नावसंभवित्तत्र संस्का
रेतरात्मादिजन्यत्वसत्वात् तथापि स्व ध्वंसराद्यजन्यत्वे सति संस्कारजन्यत्वेनान्यर्थमवसेयं। फलेतद्ध्वनितत्प्रकारा
नुभव इति सप्तम्यर्थः विशेष्यितमाश्रयतासंबंधेनानुभवान्वयि तथा च तद्विशेष्यकतत्प्रकारकानुभवत्वं य
थार्थानुभवस्य लक्षणं तत्पदार्थः प्रकारः। तद्वत्वं प्रकारतावच्छेदकसंबंधेनग्राह्यं तेन कालिकसंबंधेन घटत्वादौ जनन १८

त्वसत्वेपि रंरजनमितिभ्रमेनातिव्याप्तिः नचतथापिरंगत्वेनरंजकताभ्याहि निरंजनत्वेनचरंगावगाहि निरंभ्रमे रंगरञ्ज
नेरंग्याकारकसमूहालंबनभ्रमे गतिव्याप्तिः तत्ररंगविशेष्यकत्वरंगत्वप्रकारकत्वयोः रञ्जनविशेष्यकत्वरंजनत्व
प्रकारकत्वयोश्चसत्वादिति वाच्यं तद्विशेष्यकतावच्छिन्नतत्प्रकारकत्वविशिष्टानुभवत्वस्यपार्थविवक्षणेना
दोषात् तथाहि ययोर्विषयतयोर्निरूप्यनिरूपकभावः तन्निरूपितविषयिनयोरेवावच्छेद्यावच्छेदकभावइतिसि
द्धांतः दर्शितभ्रमेरंगत्वप्रकारतायांरंगविशेष्यतानिरूपितत्वस्यसत्वेनतत्प्रकारतायांचरंजनविशेष्यतानिरूपि
तत्वस्यासत्वेनरंगविशेष्यकतावच्छिन्नरंगत्वप्रकारकत्वरंजनविशेष्यकतावच्छिन्नरंजनत्वप्रकारकत्वयोरभा
वान्नातिव्याप्तिः स्मृतिव्यावृत्तयेनुभवत्वनिवेशः एतत्सकलमग्रेस्फुटीभविष्यति ननु तद्धर्मीत्यस्यतदधिक
रणोद्देश्यकतयाघटेघटत्वमिति प्रमायामव्याप्तिः आधेयतायाः स्वरूपनियामकतया तेनसंबंधेनघटेघटत्वपत्र

दीपि०प्र०
१९

काराश्रितधरताप्रसिद्धेरित्याशयेन शंकते नन्विति घटे घटत्वमितीति । तद्वतीत्यस्य तत्संबंधिनीत्यर्थः एवं च घटत्वस्याविष
र संबंधितया तादृशप्रमाया मायेयत्तया घटसंबंधिघटत्वविशेष्यकत्वावच्छिन्नप्रकारकत्वस्य सद्भावान्नाव्याप्तिरिति
समाधत्ते यत्रेति । यथार्थानुभव एवेत्येवकारेणापयार्थस्मृतिव्यवच्छेदः । यथार्थज्ञानमात्रस्य प्रमात्वे स्मृतिकरणा
स्यप्रमाणांतरतापत्तेरिति भावः । अतिव्याप्तिरिति । संयोगाभाववति संयोगप्रकारकत्वसत्त्वादिति भावः । पर
वच्छेदेनेति । यदवच्छेदेन यत्संबंधावच्छिन्नप्रतियोगिताकप्रभावः तदवच्छेदेन तेन संबंधेन तत्प्रकारकानुभवस्य
विवक्षितत्वादित्यर्थः । संयोगाभावावच्छेदेनेति । संयोगाभावावच्छेदकावच्छेदेनेत्यर्थः । संयोगावच्छेदेन । संयो
गावच्छेदकावच्छेदेन । संयोगसंबंधस्येति समवायसंबंधेन संयोगस्येत्यर्थः । अत्रेदमवधेयं इदमव्याप्यवृत्तिसंयो
गादिप्रकारकभ्रमानुरोधेन । व्याप्यवृत्तिरजतत्वादिप्रकारकभ्रमत्वस्यानुगमे संबंधावच्छिन्नप्रतियोगिताक १९

दभाववान्पक्षइति विशेष्यकत्वावच्छिन्नं तन्नसंबंधावच्छिन्नतन्नप्रकारत्वाकलविशिष्टानुभवत्वं प्रतियोगितायां प्रका
रतावच्छेदकसंबंधावच्छिन्नत्वनिवेशान्नपर्वतो वह्निमानितिभ्रमायां समवायावच्छिन्नवह्न्यभाववत्पर्वतविशे
ष्यकत्वसत्त्वेपि नातिव्याप्तिः। विशेष्यित्वप्रकारित्वयोरवच्छेद्यावच्छेदकभावविरहेण नद्रूमे रंगरजते इदमाका
रकप्रमायां रंगत्वाद्यभाववद्रजतादिविशेष्यकत्वं रंगत्वादिप्रकारकत्वयोः सत्त्वेपि नातिव्याप्तिरित्यलमतिवि
स्तरेण प्रसंगादिति। स्मृतेर्थेपि प्रमानर्हत्वं प्रसंगस्तस्मादित्यर्थः सामान्यतो। वगतस्ये तद्विशेषरूपेण प्रतिपा
दने संभवतीति सामान्यलक्षणं स्फुटयति प्रमायाः करणं प्रमाणमिति। असाधारणेतीति। दिक्कालाद्
षादेः कार्यत्वावच्छिन्नं प्रत्येव कारणत्वात् अनुभवत्वव्याप्यधर्मावच्छिन्नप्रमात्वनिरूपितकार्यतानिरूपितकारण
त्वरूपप्रमासाधारणकारणत्वस्य तत्रासत्त्वान्नातिव्याप्तिः। व्यापारवत्वे सतीत्यपि वक्तव्यमन्यथा सुस्स

दी॰पि॰प्र॰ योगादीनानिव्याप्तिः। श्रोत्रमनस्संयोगः शब्देव्यापारः संभवत्येवेति नच श्रोत्रेन्द्रिये करणलक्षणाव्याप्तिरिति वदन्ति

१९ ।यद्विलंबात्मकृतत्कार्यानुमापदत्तकारणत्वस्यासाधारणकारणत्वान्मकन्यायकालादिषु नादृशकारणत्वाभा

वान्नातिव्याप्तिः व्यापारत्वं नाभिमतमेन्द्रियसंयोगादिकमेव करणं एतत्रलिंगपरामर्शो नुमानमिति मतं एव

स्फुटीभविष्यतित्यतएवमणिकारैरप्युक्तं तत्र लिंगपरामर्श इति ग्रंथेनेति नुमन्तव्यः। अधिकमस्मद्दीपमणिप्र

भायामनुसंधेयं। नियतेतीति नियतत्वं हि व्यापकत्वं तत्र रासभादेर्न संभवतीति तत्र न घटकारणत्वातिप्रसक्ति

रिति भावः। पूर्ववृत्तीतीति। स्वव्यापकतत्स्वसमिन्स्वेलेपि स्वपूर्वकालवृत्तित्वस्य सत्वेन नातिप्रसंगइति भा

वः। कार्यतावच्छेदकसंबंधेन कार्याधिकरणे कार्याव्यवहितप्राक्क्षणावच्छेदेन विद्यमानात्यन्ताभावप्रतियोगिता

नवच्छेदकतद्धर्मवत्वं तेन रूपेण कारणत्वमिति समुदितार्थो बोध्यः। कारणं स्यादिति। तस्य नियतपूर्ववृत्तित्वा १९

दिति भावः । निबंधांतरे त्वन्यथासिद्धेः पंचविधत्वेपि मणिकारमताभिप्रायेणात्रिविधेति । येन सहैवेत्यादि । येन तं
तुना सहैव यस्य तंतुरूपस्य यं पटं प्रति पूर्ववृत्तित्वमवगम्यते तं पटं प्रति तत्तंतुरूपं तेन तंतुनान्यथासिद्धमित्यर्थः
। अत्र सहितत्वमेकज्ञानविषयत्वं बोध्यं । तंतुरूपस्य पटपूर्ववृत्तित्वज्ञाने नतिप्रसक्तेन तंतुरूपत्वेनैव विषयतात्वा
त्तथा च तंतुरूपमन्यथासिद्धं एवं तंतुत्वस्य पूर्ववृत्तित्वज्ञानमपि न तंतुविषयकमेवेति तदप्यन्यथासिद्धमिति भावः
। येनेत्यस्य सतंत्रान्वयव्यतिरेकशालिनेति यस्येत्यस्य च सतंत्रान्वयव्यतिरेकशून्यस्येति विशेषणं बोध्यं तेन ननन त
घाभ्नेनंतंतुत्वेन तंतोरन्यथासिद्धिः नवानं तु संयोगस्य तंतुनासहान्यथासिद्धिरिति संक्षेपः । इतरान्वयव्यति
रेकप्रयुक्तान्वयव्यतिरेकशालि यत्तदन्यथासिद्धमिति तृतीये । शब्दं प्रतीति । आकाशत्वविशिष्टस्य समवायिकारण
त्वं तथा च शब्दकारणत्वमादाय हीत्वाकाशस्याकाशत्वेन घटपूर्ववृत्तित्वं गृहीतुमशक्यमित्याकाशोऽन्यथा

दीपि·प्र·

२०

सिद्धत्वमर्थः। अन्यत्रक्लृप्तेति। अपाकजरूपं प्रति क्लृप्तनियतपूर्ववृत्तित्ते नागंधप्रागभावे नैवपाकजरूपत्वेऽपि तन्नेऽभवे
रूपप्रागभावयोः अन्यथासिद्धत्वमर्थः। अथैवं नियतपूर्ववृत्तित्वं अनियततरासभादेन तो घान्यथासिद्धत्वेन सम्मतेनैववा
रणासंभवादिति चेन्न घटसामान्यं प्रत्यन्यथासिद्धस्य संभवात्। अन्यत्र घटव्यक्तिं प्रति दोक्लृप्तपूर्ववर्तिनः तंत्वादि
तो घटोत्पत्तिसंभवादिति। नवीनाः पुनरेवमाहुः लघुनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्येक
विधमेवान्यथासिद्धत्वं लघुत्वं च शरीरकृतमुपस्थितिकृतं संबंधकृतं च तत्र प्रथममनेकत्वकल्पनापेक्षयाकल्पत्वे।
द्वितीयं गंधं प्रति रूपप्रागभावापेक्षया गंधप्रागभावे गंधस्य प्रतियोगिन उपस्थितत्वेन शीघ्रोपस्थितत्वेऽतः। त
तीयं दण्डत्वं दण्डरूपाद्यपेक्षया दंडादेः साक्षात्परंपरासंयोगादिरूपपरंपरया गुरुत्वात् एवं चैवं ताव तैवानिर्वाहे। अन्यथा
सिद्धित्रिविधा पंचधा वेति प्रपंचो व्युत्पन्नविचिकित्सापः नवनियतपूर्ववृत्तिरासभादेरन्यथासिद्धत्वेनैव वारणादिति

२०

वाच्यं यत्तु अन्यथासिद्धत्वस्यानुगतस्यैकस्य दुर्वचतया यत्र पत्रप्रामाणिकानामन्यथासिद्धत्वव्यवहारः तत्तद्भेदकूटं
निवेशनीयं लघुनियतत्वादिकं तु भेदप्रतियोगितावच्छेदकपरिचायकमिति ध्येयं च तत्रानियतानन्तरासभादीनां
मेकैकनियतत्वविशेषणेनैव वारणात्तत्तद्भेदकूटनिवेशगौरवे निपन्नानां दंडत्वादीनां सनायमानं तद्
द्रव्यत्वे निवेशनीयमित्यभिसंधिरिति यस्मिन्समवेतमित्यस्य इति । यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ने समवायेनो
त्पद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणमिति परमार्थः । कारणेन पटेनेति । तत्कार्यका
रणेन पटेनेत्यर्थः । रूपं नेत्यनु रूपं पटादिकं प्रति तन्तुरीत्या तन्तुसंयोगादीनामसमवायिकारणत्ववारणाय
तत्तत्समवायिकारणलक्षणे तद्भिन्नत्वं देयमिति दिक् । ननु गुणविषयतानिरूपकस्य निर्विकल्पकत्वा
नस्य निरूपकतासंबंधेन प्रकारताभावस्यापि त्वमिव विशेष्यताभावस्यापि तत्वे संसर्गताभावस्यापि तत्वे चलक्षणासंभव इति वि

दी॰प्र॰ निगमनाविरहादित्यतोलक्षणत्रयंप्रदर्शयन्ति।विशेष्येति॰विशेष्यादिविषयाविशेष्याद्यनवगाहिज्ञानमित्यर्थ
२१ ः।तथाचज्ञानत्वघटितेनविशेष्यताशून्यत्वंविशेषणताशून्यत्वंसंसर्गताशून्यत्वंचेतिलक्षणत्रयंपर्यवसि
तमितिभावः।केचित्तुननुनिष्प्रकारकत्वंप्रकारताशून्यत्वंप्रकारताचभासमानवैशिष्ट्यप्रतियोगित्वंसंसर्गा
वच्छिन्नविषयतेतिपावन्ततथाचसंसर्गानवगाहिज्ञानत्वमेवसंसर्गताशून्यज्ञानत्वमेववालक्षणमास्तां
लाघवादित्यतस्तत्र्थेचमत्कार्थमाहविशेष्येत्याहुः।वस्तुतस्तुसंसर्गतायाइवप्रकारतायाअपिवि
लक्षणविषयतात्मकत्वेननिष्प्रकारकज्ञानत्वरूपलक्षणेगौरवानवकाशादितिदिक्।निर्विकल्पकस्याती
न्द्रियत्वात्तत्रप्रत्यक्षप्रमाणासंभवादनुमानंप्रमाणयतिगौरिति॰विशिष्टज्ञानत्वादितिविशिष्टबुद्धिजनि
विशेषणज्ञानसकारणत्वान्यथाप्रयोजकत्वशंकेतिभावः।अनवस्थाप्रसंगादिति।सविकल्पकस्यविशिष्ट २१

बुद्धित्वेन विशेषणज्ञानजन्यत्वनियमादिति भावः। विशेष्यविशेषणसंबंधावगाहीति। अत्राप्युक्तरीत्या लक्षणा
त्रयं बोध्यं। मन इंद्रियेणेति। संयुज्यतेऽनेनेत्यन्वयः एवमग्रेपि। आत्मप्रत्यक्षसंग्रहाय तु आत्ममनसोः संयु
क्तत्वं प्रत्यक्षज्ञानमुत्पद्यत इति योजना तरेण। कथं चात्र संबंध इति। न चात्र स्पर्शनभोरूपत्वेन तत्समवा
योऽत्मस्पर्शादेः प्रसक्तिरिति शंक्यं। अनित्यसंयोगानंगीकर्तादिविवरणात् नभोनुयोगिकत्वे विशिष्टसमवाय
स्यैव प्रत्यक्षहेतुत्वांगीकारेणानादृशसंबंधस्य स्पर्शादेरभावादिति भावः। प्रथमतः भेरीदंडसंयोगेन
नभसि शब्दोत्पद्यते तेन श्रवणः तेन श्रोत्रं नभः स्वरूपं स्वसंबंधेन विशेष्यभावो। अनविषयतारूपः अपि तु
स्वरूपसंबंधावच्छिन्नाधाराधेयभावरूपमेवेत्यस्य। पविष्यत्वे विशेषणतादीनां संयुक्तविशेषणतानां ता
रूपेण बहुविधत्वेपि अनुगतत्वायंत्वतंत्रेष इत्यादिन्यायानुसरणेनादोषादिति। एतेन। अभावप्रमा

दीपि·प्र·

२२ याविशेष्यविशेषणाभावसन्निकर्षजन्यत्वप्रदर्शनेन। प्रमाणान्तरत्वं। प्रत्यक्षाद्यतिरिक्तप्रमाणत्वात्। ननु अनुप
लब्धेः प्रमाणान्तरत्वानङ्गीकारे घटोपलब्धिदशायां तदभावप्रत्यक्षापत्तिः मममनेतु अनुपलब्ध्यात्मके प्रमा
णान्तराभावान्नापत्तिरिति भाट्टाशंकां परिजिहीर्षुर्योग्यानुपलब्धेरिंद्रियसहकारित्वमात्रेणैव निर्वाहे इति
रिक्तप्रमाणत्वमसंभवीत्याह यद्यत्रेत्यादिना। अत्र वस्तुसंयोगादिमद्भूतले। न कंस्यादकाभावसाधकवि
पर्ययप्रतियोग्यापादकत्वरूपेविषयेयेनत्वे कोऽपि यद्यसापि त्वं दर्शयति दर्शनाभावान्नास्तीति तद्दर्शना
भावात्तन्नास्तीत्यर्थः। तर्कितेत्यादि। तर्कितः आपादितापत्तियोगी नो घटादेः मत्वस्य सत्वप्रसंजनस्य विरो २२
धिनी या उपलब्धिः तत्प्रतियोगिकोऽभावोऽनुपलब्धिः तन्नेह कृतनेत्यर्थः। विरोधित्वविशेषणमुपल
ब्धेरनाहार्यत्वसूचनाय। प्रतियोगिसत्वापादनापादितोपलम्भप्रतियोगियोग्यतारूपयोग्यताविशिष्टानुपल

ब्धिसहकृतेनेनेति नुपरमार्थः॥ आलोकसंयोगाद्यसत्त्वदशायां घटघटत्वघटः स्यान्न तर्हि उपलभ्येतेत्यापादनासंभवेनयो
ग्यानुपलब्ध्यभावान्न तत्र घटाभावप्रत्यक्षमिति संक्षेपः॥ केचित्तु न तर्कितेत्यादि तर्कितत्वं आरोपितत्वं यत्तत्तु योगि
सत्त्वं न त्विहारोपणीया॥ अनुपलब्धिः तत्सहकृतेनेत्यर्थः॥ एतावता प्रतियोगिसत्त्वरूपकारणाभावप्रयोज्यो ऽनुपल
ब्ध्यभावः अभावप्रत्यक्षे कारणं न तु तदितरकारणविरहप्रयोज्यो ऽनुपलब्ध्यभाव इति सूचितं अत एव बाधकारे
उपलंभाभावसत्त्वेपि न घटाभावप्रत्यक्षमिति स्फुटः॥ नन्वभावप्रमायामिंद्रियस्य करणत्वमनुपलब्धेः सहका
रित्वं च लयाकल्पनीयं तत्र द्वयोरपि॥ अनुपलब्धेरेव करणत्वकल्पनं वरमिति नाशंक्याभावादिकरणाभूतलप्रत्य
क्षे इंद्रियस्यावश्यकल्पनीयतयाक्लृप्तेनैवेंद्रियकरणत्वेनाभावप्रत्यक्षोपपत्तावनुपलब्धेर्विजातीयप्र
मितिकरणत्वकल्पनमयुक्तमित्याह अधिकरणेति॥ ननु विशेष्यविशेषणभावाख्यः संबंधः अतिरिक्तः क

दी.पि.प्र. स्मनीयः तयेत्यनन्याहतविशेष्यविशेषणाभाववृत्ति। अत्रेदं बोध्यं प्रत्यक्षं द्विविधं लौकिकमलौकिकं चेति लौकिकं चवि
षयिता विशेषः लौकिके षोढा सन्निकर्षः कारणं अलौकिके तु सामान्यलक्षणा ज्ञानलक्षणा योगजधर्मश्चेति त्रि
२३ विधप्रत्यासत्तिः तत्र सामान्यलक्षणा धूमत्वादिरूपा तज्ज्ञानरूपा वा सामान्यलक्षणा स्वरूपविषयो वा यस्याः इति व्यु
त्पत्तेः सा चाश्रयाणां निखिलधूमादीनामलौकिकप्रत्यक्षे उपयुज्यते। तीतानागतधूमादिषु च चक्षुःसंयोगादे
रसंभवात् इंद्रियाणामसन्निकृष्टानां प्रत्यक्षात् ज्ञानलक्षणा तु सुरभिचंदनमिति वा चक्षुषोपनीतभाने सौ
रभेण च चक्षुषो योग्यसन्निकर्षासंभवात् एवं योगिनां देशकालविप्रकृष्टपदार्थप्रत्यक्षे योगजधर्मः प्रत्यासत्तिरिति
संक्षेपः। इति तर्कसंग्रहदीपिकाप्रकाशे भागवद्दर्पिते प्रत्यक्षपरिच्छेदः॥ श्रीदक्षिणामूर्तिगुरवे नमः। अनुमा
नेन लक्ष्यतीति। प्रत्यक्षोपजीवकत्वसंगत्या अनुमानं निरूपयतीत्यर्थः। परामर्शजन्येति। तथा च प्रत्यक्षप्रमितस्मेक्ष
२३

पाऽनुमिते वह्निलक्षणसाध्ये निश्चितत्वेनानुमानस्य प्रमाणान्तरत्वं सिध्यतीति भावः। विपरीतज्ञानोत्तरमत्यसंप्रतिविशेषदर्शन
स्य हेतुत्वमंगीकुर्वतां मतमवलंब्याशंकते नन्विति। स्थाणुपुरुषसंशयोपेति इदं विरुद्धभावद्वयकोटिकसंशयांगीकारेण। परे
तु स्थाणुपुरुषेति स्थाणुत्वतदभाववत्पुरुषत्वतदभावकोटिकेत्यर्थ इत्याहुः। पुरुष एवेति निर्णयसमानाय। नत्र। संशयोत्त
रमस्य सत्यत्वे। अनुमानस्याप्यविरोधादिति तदनुपपन्नस्थाणुपुरुषमनुमितेरनुपपत्तौ स्थाणुत्वसाधकाभावेन प्रमाणाभावादि
त्यपि द्रष्टव्यं। संशयोत्तरमप्रसज्जनीयेवक्ष्यमाणपक्षतायाः परामर्शसहकारित्वे प्रयोजनाभावेन पक्षतासह
कृतपरामर्शजन्यत्वविवक्षणात्। निश्चितव्याप्तिमत्याह पक्ष इति। एतेन वह्निव्याप्यधूमवत्पर्वतवानयमिति विशिष्ट
वैशिष्ट्यावगाहिबुद्धिमति विशेषणतावच्छेदकप्रकारकनिर्णयविधुरावह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य
कारणत्वेऽपि न तत्रानुमित्यापत्तिः। पक्षतासहकृतपरामर्शजन्यत्वस्य सत्त्वेनातिव्याप्तेरभावादिति संक्षेपः। यद्यपि

दीपि॰प्र॰ साध्यसन्देहस्य सत्त्वेपि साध्यनिश्चयकालेऽनुमितिवारणासंभवतिन व्याप्तिग्रहनगर्जनेन मेघानुमितौ व्यभिचारः अतोऽपा
दृशीं पक्षतामाह सिषाधयिषेति। सिषाधयिषायाः साध्यानुमित्सायाः समवायेन योऽभावः स्वरूपसंबंधेन तद्वत्पक्ष
२८ त्वं न सामानाधिकरण्यसंबंधेन तत्र सिषाधयिषायाः सिद्धेः समवायेनाभावस्तथ्यं ॥ साध्यपि सिद्धिः पक्षतावच्छेदकविशिष्टसा
ध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहिनिश्चयः। सिद्धौ सिषाधयिषाविरहवैशिष्ट्यनिवेशनस्य प्रयोजनं दर्श
यति सिद्धिसत्त्वेपीति। अत्र सिद्धिश्च पर्वतो वह्निमान् वह्निव्याप्यधूमवांश्चेति समूहालंबनरूपास्तत्परामर्शसपत्नी नि
श्चयं॥ व्याप्तिविशिष्टपक्षधर्मताज्ञानमिति। अत्र व्याप्तिविशिष्टपक्षधर्मता व्याप्तिविशिष्टपक्षधर्मतात्वज्ञानमिति स
मीचीनं तस्मुरुष्यंगीकारे व्यभिचारिलिंगकानुमितौ व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वाभावेनाव्याप्तिरतः व्याप्तिविशि
ष्टपदस्य व्याप्तिविषयकेत्यर्थमवलंब्य ज्ञानं न पदेन कर्मधारयमंगीकरोति व्याप्तिविषयकमिति। व्याप्यावच्छिन्नप्रका २८

रत्ता निरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयः परामर्श इति तु निर्गलितार्थः ॥ अभिनीय ' अभिलापकश त्वनुभा
पे । नियतत्वसामानाधिकरण्यं साध्याभाववद्वृत्तित्वादिरूपं न सम्भवति इदं वाच्यज्ञेयत्वादिसाध्यकेऽव्याप्तेः साध्याभावाप्रसिद्धे
रित्याशयेनाह हेतुसमानाधिकरणेति ॥ वह्निमान्धूमादित्यादौ धूमसमानाधिकरणो योऽन्योन्याभावः घटान्यत्वाभावः तत्प्रति
योगी वह्निः न तत्सामानाधिकरण्यं धूमेऽस्तीति लक्षणसमन्वयः ॥ धूमवान्वह्नेरित्यादौ तु धूमसामान्याभावस्यापि हेतुसमानाधि
करणतया तत्प्रतियोगित्वं च धूमे इति नातिव्याप्तिः ॥ ननु वह्निमान्धूमादित्यादौ न तद्घटाभावस्य चालनीन्यायेन धूमसमानाधिक
रणतया तादृशाभावप्रतियोगित्वं न कस्यापि वह्नेरित्यव्याप्तिरिति चेत् अत्र प्रतियोगिसाध्येत्यस्य प्रतियोगितानवच्छेदक
साध्यतावच्छेदकावच्छिन्नसामर्थ्यं तात्पर्यं कर्तव्याऽदोषात् प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वं निवेशनीयं ।
तेन वह्निमान्धूमादित्यादौ समवायेन वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य धूमसमानाधिकरणत्वेपि न क्षतिः ॥ हेतु

दी.पि.प्र पदं हेतुतावच्छेदकावच्छिन्नपरं अतः द्रव्यं विशिष्टसत्वादित्यादौ विशिष्टस्य शुद्धानतिरेकितया हेत्वधिकरणगुणादि
२५ निष्ठत्वेपि द्रव्यत्वाभावस्य नाव्याप्तिः हेत्वधिकरणता हेतुतावच्छेदकसंबंधावच्छिन्ना ग्राह्यानेन वह्निमान्धूमादित्या
दौ वह्निसामान्याभावस्य धूमसमवायिनिष्ठत्वेपि नाव्याप्तिः नचैवमपि कपिसंयोगी एतद्वृक्षत्वादित्यादावव्या
प्तिः साध्यस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वादिति वाच्यं हेतुसमानाधिकरणाभावे
प्रतियोगिवैयधिकरण्यस्य निवेशनीयत्वात् केवलान्वयिसाध्यकेनादृशस्य घटाभावादेः प्रसिद्धत्वान्नाव्याप्ति
रितिः अधिकमस्मदीयमणिदीधितिनिष्पाव्यापंका बुद्धिकुशलैरनुसंधेयं. स्वार्थानुमितिमिति स्वस्यार्थः प्रयोजनं
साध्यसंशयनिवर्तनरूपं यस्याः इति स्वमत्यास्वीयसंशयनिवर्तनप्रयोजनकानुमितिरित्यर्थः। यद्यपन्निति. एक २५

संबंधज्ञानमपरसंबंधिस्मारकमितिरीत्या दर्शनस्य स्मृतिहेतुत्वादिति भावः। कथंव्याप्तिग्रह इतीति। व्यभिचारज्ञानस्या
यां न कश्चिदपि व्याप्तिनिश्चयमभ्युपैतीति भूयोदर्शनस्य व्याप्तिनिश्चयहेतुत्वं न संभवतीति भावः। इदमुपलक्षणं। भूयो
दर्शनमित्यस्य भूयसां दर्शनानां समाहार इति भूयसां साध्यहेतूनां दर्शनमिति भूयस्स्वधिकरणेषु दर्शनमिति वार्थः
।नाद्यः एकत्रैव सहचारदर्शनधारया व्याप्तिनिश्चयप्रसंगात्। न द्वितीयतृतीयौ। एतद्रूपवानेन इसादित्यादौ साध्यहेत्वो
रधिकरणोभवभूयस्त्वाभावेन व्याप्तिनिश्चयानुत्पादप्रसंगादित्यपि बोध्यं। मणिकारसिद्धांतमवलंब्याह व्यभिचारज्ञान
विरहेति व्याप्तिग्राहकत्वादिति। व्याप्तिश्च हेतुसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदका
वच्छिन्नसाध्यसमानाधिकरण्यं हेतिहेतुतावच्छेदकरूपेण सामानाधिकरण्यं तस्य रासभादिसाधारण्यापातः धूमत्वादे
: स्वरूपतो व्याप्यतावच्छेदकपर्यारेकोपि न सत्तिः इत्यत्र च साध्यतावच्छेदकेन यावतिधप्रतियोगितानवच्छेदकत्वं

दीपि॰ प्र॰
२६

शत्रहे साध्यतावच्छेदकेन यादृशप्रतियोगितावच्छेदकत्वरूपव्यभिचारग्रहाभावो विपरीतग्रहाभावाद्विषयो हेतुः
साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे तु विशेषणज्ञानविषयासामानाधिकरण्यज्ञानं हेतुरिति साध्य
भिचारस्थानाभावसामानाधिकरण्यज्ञानयोः व्याप्तिग्रहहेतुत्वेनेति ध्येयं। वस्तुतस्तु हेतुव्यापकसाध्यसामानाधिकरण्य
मेव व्याप्तिः न तु व्याप्तेः सम्भवासाधारण्येन प्रमात्मकत्वमप्यलिङ्गकपरामर्शान्न भ्रमात्मकत्वं न्यायानुमितिस्थापत्तिः प्रमात्म
कपरामर्शस्य प्रमानुमितिजनकत्वनियमस्य नेतापत्तेरयोगादिति वाच्यं यद्धर्मावच्छिन्नव्यापकत्वं व्याप्तिघटकं तत्
द्धर्मावच्छिन्नतावच्छेदककव्याप्तिकारकत्वनिश्चयस्यैवानुमितिहेतुत्वोपगमेनादोषात्। अत एव व्याप्तिशरीरे धूमत्व
त्वावच्छेदेन लाघवमिति दिक्। शंकाचेति। व्यभिचारसंशयस्यापि व्याप्तिग्रहप्रतिबंधकत्वानुभवाच्चेत्यस्य धरण
व्यभिचारज्ञानत्वावच्छिन्नाभावो हेतुरिति हृदयं। तद्विरहः। व्यभिचारशंकाविरहः। क्वचिदिति॰ तर्काभावे मर २६

निखिलकारणसमवधानस्थले दृष्टं। क्वचिन्मा भूदित्य एवेति। इतरकारणविरहस्थले नादृशाकारणावि
रहमयुक्त एवेत्यर्थः। तथा च न तत्र तर्कापेक्षेति भावः। धूमाग्न्योरिति। धूमाग्न्योर्व्याप्तिग्रहे उत्पन्नस्य मानस्य व्यभिचार
शंकानिवर्त्तकः कार्यकारणभावभंगप्रसंगलक्षणस्तर्क इत्यन्वयः। स च तर्कः धूमो यदि वह्निव्यभिचारी स्यात्
तर्हि वह्निजन्यो न स्यादित्याकारको बोध्यः। ननु महानसीयवह्निधूमयोः सन्निकृष्टत्वेन सहचारग्रहेप्यन्येषां वह्नि
धूमानामसन्निकर्षेण सहचारस्य ग्रहासंभवेन निखिलधूमेषु व्याप्तिग्रहस्य न संभवति तथा च पर्वतीयधूमदर्श
नेन व्याप्तिस्मरणासंभवात्परामर्शानुपपत्तिरित्याशयेन शंकते नन्विति। सकलवह्निधूमेषु लौकिकसन्नि
कर्षाभावेपि सामान्यप्रत्यासत्त्यात्मकालौकिकसन्निकर्षसद्भावात् वह्नित्वावच्छिन्नसमानाधिकरणत्वेन नि
खिलवह्निधूमसहचारग्रहस्य संभवान्निखिलधूमेषु व्याप्तिग्रहः संभवति एवं च पर्वतीयधूमेपि व्याप्तेर्गृहीतत्वेन

दीपि॰ प्र॰
२८

धूमदर्शनेनस्मरणासंभवात्परामर्शानुपपत्तिरितिसमाधत्तेवह्नित्वधूमत्वेतिपद्यपि परार्थानुमानशब्दस्यपरस्यमध्यस्थस्य
स्वार्थःप्रयोजनंसाध्यानुमितिरूपंयस्मादितिव्युत्पत्त्यापरसमवेतानुमितिकरणलिंगपरामर्शोर्थःअतएवस्वार्था
नुमितिपरार्थानुमित्योर्लिंगपरामर्शएवकरणमित्याद्यग्निममूलंसाधुसंगच्छतेतथापिपरार्थानुप्रयोजकेपंचावयव
वाक्येपरार्थानुमानशब्दस्यौपचारिकःप्रयोगइतिपरार्थमनुमानंयस्मात्तत्परार्थानुमानमितिवामनसिकृत्यमूल
मवतारयतिपरार्थानुमानमाहेति।पंचावयववाक्यमित्यनेनपंचावयवाःयस्यवाक्यस्येतिव्युत्पत्त्याप्रतिज्ञादि
वाक्यपंचकसमुदायत्वंन्यायलक्षणंबोध्यं।अनेनप्रतिज्ञादीनांलिंगगारितिमूलस्य।प्रतिज्ञादिपंचकसमुदायघटकयोग्य
लिंगपरामर्शादिरर्थः।साध्यवत्तयापक्षवचनमिति 'साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारताकपक्षतावच्छेदका
वच्छिन्नपक्षविशेष्यकबोधजनकवाक्यमित्यर्थः।उदाहरणावसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानंजन २८

पक्षतावच्छेदकविशिष्टेऽपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमिति नतयोर्निरा
सः। वाक्यपदस्यन्यायावयववाक्यपरत्वात् न्यायवहिर्भूतवाक्यव्युदासः। एवमग्रेऽपि। अपनं स्वहाहुः संयोगान्न्यद्रव्य
त्वादिसाद्गैप्रजिकोपायं च म्पनत्वसत्वादपि निव्याप्तेर्वारणाय लिंगमाननिपादकमिति। हेतुमाननिपादकवाक्यमित्य
र्थः। व्याप्तिप्रतिपादकमिति। प्रकृतहेतुमतिप्रकृतहेतुव्यापकत्वविशिष्टसाध्यबोधकवाक्यमित्यर्थः। कथमुदाह
रणस्य व्यापकत्वबोधकत्वेनेति चेदित्थं साध्यवदस्य हेतुव्यापकत्वशिष्टविषसाध्येनिरूपणलक्षणाया। नचाहिरूकपनय
दस्यैवैयर्थ्यमिति शंकनीयं सत्यात्पर्येग्राहकतया सार्थकत्वात्। अथवा प्रथमपदस्य सार्थ्यमहानसे द्वितीयपदस्य सार्थ्यं च
महानसान्यास्मिन्नप्रकृतहेतुमत्त्वस्य नतु पराथ्वे तस्मिन् साध्यस्य वशात् बोधेनानेन्यकाले व्यापकताबोधे
मानसः नथा वव्याप्तिप्रतिपादनप्रतिपत्तिपरत्वमुदाहरणस्याक्षतमिति न कश्चिद्दोषगन्धः इतिदिक्। व्याप्तिविशिष्ट

दीपि. पृ.
२८

लिंगप्रतिपादकमितिपक्षतावच्छेदकविशिष्टविशेष्यकप्रकृतसाध्यव्याप्यहेतुमत्प्रकारकबोधजनकवाक्यमित्यर्थः। पक्षधर्म
ताज्ञानार्थमुपनयइति पाठे तु प्रयुज्यतइतिशेषपूरणेन प्रदर्शितार्थएव यथाकथंचित्संगमनीयः। हेतुसाध्यवत्तापा:
पक्षवचनमिति हेतुज्ञानजन्यव्याप्यत्वविशिष्टसाध्यवद्विषयकबोधजनकवाक्यमित्यर्थः। उत्तरकालमबाधितत्वासत्प्रति
पक्षितत्वविषयकबोधोमानसोद्रष्टव्यः। ननु विशिष्टवैशिष्ट्यावगाहिपरामर्शस्यानुमितिप्रतिहेतुत्वेनत्रानन्यथा
सिद्धत्वनियतपूर्ववृत्तित्वयोःकल्पनीयतया गौरवं वह्निव्याप्यो धूमो धूमवान्पर्वत इति ज्ञानद्वयस्य तु तन्मते विशिष्ट
परामर्शप्रतिकारणत्वेनक्लृप्तस्यकारणत्वेनअनन्यथासिद्धत्वमात्रस्यकल्पनीयतया लाघवमिति प्राभाकराःशंक
न्ते नन्विति। वह्निव्याप्यवानयमिति। अत्रत्वदभिमतकारणस्यासत्त्वेनव्यभिचारान्ज्ञानद्वयस्यकारणत्वंसंभवती
तिभावः। कथंचिदपि व्याप्यतावच्छेदकधूमत्वादेर्भानंपरामर्शेनसंभवतीतिस्फोरणाय शब्देति। लाघवेनेति। कल्पना २८

लाघवेनेत्यर्थः। तथा हि ज्ञानद्वयेऽनन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोः कल्पनापेक्षया विशिष्टपरामर्शे तत्कल्पने तस्यै
व लघीयस्त्वमिति। वस्तुतस्तु तद्धर्मावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयविशिष्टतद्धर्मावच्छिन्नप्रकारकपक्षताव
च्छेदकावच्छिन्नविशेष्यकनिश्चयत्वस्यैव कारणतावच्छेदकत्वं ज्ञानद्वयसाधारणपानुगमे येन तेन मतद्वयं नैयायिकम
ते नुव्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वं कारणतावच्छेदकमिति कारणतावच्छेदकलाघवमवधेयम्। विनिगमना
विरहेण ज्ञायमानलिङ्गत्वेनापि कारणत्वं वक्ष्यमाणाचार्याणां मतं निरस्यति लिङ्गं न करणमिति। व्यभिचारादिति। तत्रा
पि अनुमितेरनुभवसिद्धत्वेन तद्व्यवहितपूर्वभूतभविष्यल्लिङ्गमादायासत्त्वादिति भावः। मतद्वितीयफलायोगव्यवच्छिन्नं
कारणं करणमिति मतेनानुपरामर्श एव करणमिति निषेध्यं। करणेऽतिव्याप्तिवारणाय तज्जन्यत्वे सतीति यद्यपि अ
नुमाननिरूपणस्यैव प्रतिज्ञानत्वेन तद्विभाग एवोचितः तथापि लिङ्गस्य त्रैविध्यप्रदर्शनेन तज्ज्ञानस्य त्रैविध्यं फल

दी·पि·प्र·
२६

तीति मनसिकृत्याह लिंगं विभजते इति। अन्वयेन व्यतिरेकेण च व्याप्तिमदिति मूलस्यान्वयसहचारग्रहग्राह्यव्याप्तिमत्वे स
ति व्यतिरेकसहचारग्रहग्राह्यव्याप्तिमदित्यर्थं मनसि कृत्य तादृशव्याप्तिद्वयं प्रकाशयति हेतुसाध्ययोरिति। अन्वयमात्र
व्याप्तिकत्वरूपं केवलान्वयि लक्षणे मात्रपदेन व्यतिरेकव्याप्तेर्व्यवच्छेदः तत्पासिध्यासिद्धिम्पां व्याख्यानद्वारालोच्य प्रका
शनेनोपपरिष्करोति केवलान्वयिसाध्यकमिति। केवलान्वयिसाध्यकव्यतिरेकिहेतोः संग्रहाय साध्ये केवलान्व
यित्वनिवेशितं तदेव निर्वक्ति अत्यन्ताभावेति। निरवच्छिन्न इति मदत्यन्ताभावे इत्यर्थः। तेन गगनाभावसंयोगाभा
वादिसाध्यकहेतोः संग्रहः। घटपदार्थाभिधेयत्वस्याप्रत्ययवत्स्तेन सर्वत्र सत्वासम्भवाद्वाराहमंत्रपदाभिधेयत्वमिति।
मूले व्यतिरेकमात्रव्याप्तिकमिति। निरुक्तव्यतिरेकव्याप्तिमात्रकमित्यर्थः तेन पृथिवीइतरेभ्यो भिद्यते गंधवत्वा
दित्यादौ अन्वयव्याप्तेः सत्वेपि न लक्षणासंगति। इतरभेदः पृथिवीत्वावच्छिन्नप्रतियोगिताकभेदः। अन्वयित्व २६

मिति। अन्वयसहचारस्य हेत्वाद्यव्याप्तिमत्त्वस्यादिरर्थः। तथाच प्रसिद्धानुमानमिवैतदप्यन्वयव्यतिरेकेण स्यादिति भाव
ः। असाधारणमिति। सपक्षव्यावृत्तत्वरूपासाधारण्यलक्षणाक्रान्तत्वादिति भावः। अप्रसिद्धसाध्यकेपि साध्यविशेषणा
कानुमितिरेवेत्यभिप्रायेण हेत्वसाध्येत्यादि। व्यतिरेकव्याप्तीति। साध्याभावव्यापकाभावप्रतियोगित्वरूपेत्यर्थः। पृथिवी
तरसामान्यभेदेन साध्यतेऽपि तु जलादिभेदकूटं साध्यं तेन तथा च नोक्तदोषावसर इत्याशयेन जलादीति। जलादीनां ये त्रयो
दशान्योन्याभावास्तेषां कूटं साध्यं तदित्यर्थः। समुदायस्याप्रसिद्ध्या यं भवाद्ये त्यत्र प्रत्येकमिति। त्रयोदशत्वावच्छिन्नेति। अनु
मितेः पूर्वं निश्चितं साध्यतावच्छेदकावच्छिन्नवतो धर्मिण एवाप्रसिद्ध्यानन्तरं हेतोः सत्त्वासत्त्वनिर्वचनेऽप्यनुपपत्त्या साधार
णेऽपि इति समुदितार्थः। प्रत्येकं प्रसिद्धावपेक्षाबुद्धिविशेषविषयत्वरूपसमुदायत्वविशिष्टज्ञानं संभवति तथा च विशेष
णतावच्छेदकप्रकारकनिर्णयस्यासम्भवात् साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाह्यनुमितिः व्यतिरेकव्याप्तिज्ञानं च सं

दापिप्र॰

३०

भवतीत्यादिप्रत्येकाधिकरणोत्यादिना। यद्यपि जलादिचतुर्दशान्योन्याभावानां चतुर्दशस्वप्रत्येकमभिनिवेशात्वकुमुचितं तथा
पि अर्थापत्तेः प्रमाणान्तरत्वं गीकुर्वन्तं प्राभाकरमासेमुखमितिरेकव्याप्तेरनुमित्यंगत्वस्य प्रदर्शनीयत्वेनयान्नमन्तसाधार
णेपन व्यतिरेकव्याप्तिप्रदर्श्यापितु जलादिद्वियोरर्थेत्यादिकथनं। नचतन्मतेजलादिचतुर्दशान्योन्याभावाः प्रसिद्धाः।
अभावस्याधिकरणानात्मकस्य तेनानंगीकारादिति वाच्यं। केचित्तु जलमेवादिर्येषां त्रयोदशानामिति विग्रहेण जला
दिप्रतियोगिकानां चतुर्दशानामन्योन्याभावानामित्यर्थः। त्रयोदशस्विति। जलादीत्यादिः। उक्तविग्रहेण चतु
र्दशस्वित्यर्थः। अग्रे यथेवंवोध्यमित्याहुः। मूले संदिग्धसाध्यवानिति विशेष्यतासंबंधेन साध्यप्रकारकसंशयविशि
ष्टरूपमर्थः। सपक्षलक्षणादिकमप्येवमेवपरिष्कर्तव्यं। पक्षलक्षणस्याव्याप्तिमाशंकतेदीपिकानन्विति। संशयपक्षविघ
टकसाध्यसिद्धिस्थले व्याप्तिमुक्तामप्रसस्थलेपि नामाहकिंचेति। उक्तेति सिषाधयिषाविरहविशिष्टसिध्यभावरूप ३०

पक्षता। अव्याप्तस्य पक्षलक्षणत्वादित्यर्थः। सद्धेतुं निरूप्येति। व्याप्त्यादिविशिष्टहेतुं निरूप्येत्यर्थः। सद्धेतुनिरूपणे। स
द्धेतोः स्मरणात्प्रसंगसंगत्यात तन्निरूपणमिति भावः। मूले हेत्वाभासा इति। हेतुवदाभासंतइति हेत्वाभासा दुष्टाहेतवः नि
रूप्यंतइत्यर्थः। ननु सामान्यधर्मप्रकारकज्ञानमंतरा विशेषजिज्ञासानुदयेन सव्यभिचारेत्यादिना विभागो। नुचित इत्या
शंकामपनिनीषुर्दोषवत्त्वलक्षणं। अभिहितेदोषवत्त्वरूपदुष्टलक्षणस्यातिस्फुटत्वाच्चाभो भवतीसनुशायेन दोषसामान्य
लक्षणमाह अनुमितीति। हेत्वाभासत्वमिति। हेतोराभासौ हेत्वाभासाः हेतुनिष्ठा दोषाः तेषां भावस्तत्त्वमित्यर्थः। ह्रदो
वह्निमानित्याद्यनुमितिं प्रति वन्ह्यभाववान्ह्रद इत्यादिबाधनिश्चयस्य प्रतिबंधकतया ममात्मकतादृशनिश्चयविषयत्वं
वन्ह्यभाववद्ध्रदादावस्तीति लक्षणसमन्वयः। तत्रानुमितिपदमजहल्लक्षणया। नुमितित्करणान्यतरपरं। तेन व्यभिचा
रादिज्ञानस्य परामर्शप्रतिबंधकत्वेनैव निर्वाहादनुमित्यप्रतिबंधकत्वेपि व्यभिचारादिषु नाव्याप्तिः। पर्वतो निर्वह्निरिति

दीपि॰प्र॰ बाधभ्रमस्य पर्वतो वह्निमानित्यनुमितिप्रतिबंधकत्वात्तद्धर्मयवन्ह्यभावादावतिव्याप्तिरतो यथार्थेति। भ्रमभिन्नेत्य
३१ र्थः। अथैवमपि वन्ह्यभाववद्ह्रदात्मकबाधैकदेशे वन्ह्यभावादावतिव्याप्तिः वन्ह्यभाववान् ह्रद इत्याकारकयथार्थज्ञानवि
षयत्वस्य तत्र सत्त्वादिति केवलपदद्वयावच्छिन्नविषयकज्ञानसामान्यमनुमितिप्रतिबंधकं तद्द्वयावच्छिन्नत्वं दोषत्व
मित्यर्थपर्यवसानेनादोषात्। वन्ह्यभावत्वावच्छिन्नविषयकस्य वन्ह्यभाववान् ह्रद इति ज्ञानस्यानुमितिप्रतिबंधकत्वे
पि नाह्रदांशज्ञानसामान्यान्तर्गतस्य वन्ह्यभावद् इत्याकारकज्ञानस्याप्रतिबंधकत्वेन वन्ह्यभावत्वादेर्यद्द्वयपदेनोपा
दानासंभवान्न वत्तर्हि यथार्थपदव्यर्थं पर्वतो निर्वह्निरिति भ्रमविषयेपि वन्ह्यभावादावतिव्याप्तेरुक्तरीत्यैव वार
णासंभवादिति वाच्यं ज्ञानपदस्य ज्ञानविशेषणान्यपर्यंतानाहकतया यथार्थपदस्य सार्थक्यान्तरावयद्वयावच्छिन्नवि
षयकानाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयसामान्यप्रकृतानुमितिप्रतिबंधकतद्द्वयावच्छिन्नत्वदोषत्वमि ३१

त्यर्थः पर्यवसितः ॥ तेन वह्न्यभाववद्ह्रदविषयकस्याहार्यस्याप्रामाण्यज्ञानविशिष्टज्ञानस्य संशयस्य चानुमितिप्रति
बंधकत्वेपि नासंभवः स्वरूपसत्त्वेपि तेन त्योरुरु ह्रदुणा नामेव लक्षणं परं तु ज्ञायमानव्यभिचारादेः प्रतिबंधकत्वमस्तु
पेत्यत्तदर्थस्तु अनुमितिबंधकायव्यभिचारादयः एकज्ञानविषयप्रकारतहेतुतावच्छेदकत्वसंबंधेन तत्प्रकारकपक्ष्या
र्थज्ञानविशेष्यत्व(धूमवान्वह्नेरित्यादौ धूमाभाववद्वृत्तित्वविशिष्टवह्नित्वे व्यभिचारः ॥ ज्ञसंबंधेन तद्वान्वह्नेरित्यादौ
रकयथार्थज्ञानविशेष्यत्वमस्तीति लक्षणसमन्वयः ॥ अनुमितिपदस्य प्रकृतानुमितिपरतया सद्धेतावनुमितिप्र
तिबंधकीभूतव्यभिचारादीनामप्रसिद्धत्वान्नातिव्याप्तिः ॥ यथार्थपदादानेन दर्शितसंबंधेन व्यभिचारप्रकारकभ्र
मविशेष्यत्वस्य सद्धेतावपि सत्त्वेनातिव्याप्तिः स्यादिति तन्निवेश इत्याहुः ॥ सन्निविष्टतीति ॥ सामान्यलक्षणानुसा
धारणाद्यन्यतमत्वे स्फुटः ॥ मूलेत्येत्ति ॥ साधारणादिष्वन्यतमत्वमित्यर्थः ॥ साध्याभाववद्वृत्तित्वेति साध्यतावच्छेदकधर्मसंबंधाव

दीधि॰प्र॰ च्छिन्नप्रतियोगिताकाभाववन्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्नाधेयतावानित्यर्थः तेन वह्निमान्धूमादित्यादौ
३२ हेतुमति पर्वतादौ तन्तसाध्याभावस्य संबंधान्तरावच्छिन्नसामान्याभावस्य च सत्त्वेपि साध्याभाववदवृत्तिधूमावयवादौ स
मवायादिना धूमादेः सत्त्वेपि नाव्याप्तिः । अत्र च साध्याभाववत्तायां संबंधविशेषावच्छिन्नत्वानिवेशे वह्निमान्धू
मादित्यादौ वह्न्याद्यभावस्य कालिकादिसंबंधेन पर्वतादौ सत्त्वेनातिव्याप्तिर्दैशिकविशेषणताविशेषावच्छिन्नत्वनि
वेशे घटत्वाभावादिसाध्यकव्यभिचारिणि साध्याभावस्य घटत्वादेर्विशेषणताविशेषेणाधिकरणाप्रसिद्ध्याव्या
प्तिरतः साध्यतावच्छेदकसंबंधेन साध्यवत्ताग्रहप्रति येन संबंधेन साध्याभाववत्तानिश्चयः प्रतिबंधकः तेन संबं
धेन साध्याभाववत्त्वं विवक्षणीयं तथा च घटादौ साध्ये तादृशः संबंधो दैशिकविशेषणता घटत्वाभावादेश्च साध्ये स
समवायस्तथेति न दोषः कपिसंयोग्येतत्त्वादित्यादौ तादृशः संबंधो निरवच्छिन्नदैशिकविशेषणत्वेनेति दिक् ॥ ३२

च विरुद्धे ॥ नित्या त्विति नित्यमिनत्वं । उपधेयसंकरेप्युपाधेरसंकरादिति न्यायेन तस्याविरुद्धसाधारण्यपिस्त्विति विरुद्धा
न ॥ सर्वसपक्षव्यावृत्तत्वे । सपक्षवृत्तित्वत्वावच्छिन्नाभाववानित्यर्थः ॥ सर्वपदं सपक्षवृत्तित्वसामान्याभावनि
वेशस्फोरकं सपक्षपदं निश्चितसाध्यवदर्थकं । तेन ह्रदेऽग्निमत्त्वसाधकशब्दत्वादिसद्धेतावपि पक्षसाध्यसंदेहद
शायामसाधारण्यस्य सत्त्वादिति संप्रदायविदः ॥ नवीनास्तु सद्धेतावपि पक्षे साध्यसंदेहदशायामसाधारण्यस्य
प्रकृतपरामर्शकालिकविरुद्धपरामर्शदशायां सत्त्वमिति पक्षस्य च स्वीकारे बाधभ्रमदशायां बाधस्याप्यंगीकारापत्तेः
न हि वैषम्ये युक्तिं पश्यामः एवं चात्र सपक्षपदं केवलसाध्यवत्परं शब्दो नित्यः शब्दत्वादित्यादिसाध्यवद्वृत्तिहेतोरे
वलक्ष्यत्वे तेन न कोपि दोष इति प्राहुः ॥ अन्वयव्यतिरेकदृष्टान्तरहित इति । तत्त्वं च किंचिद्विशेष्यकनिश्चयाविषयसा
ध्यकत्वे सति किंचिद्विशेष्यकनिश्चयाविषयसाध्याभावकत्वं । नवीनमते त्वन्वयरूपताभावाप्रतियोगित्वविशि

दी॰पि॰प्र॰ षसाध्यादिकमेवानुपसंहारित्वं तज्ज्ञानस्य व्यतिरेकव्याप्तिग्रहप्रतिबंधकता। साध्याभावव्यापक इति। साध्याभावव्याप्तिः
साध्यवद्वृत्तित्वं असाधारण्यस्य तु निश्चितसाध्यवद्वृत्तित्वरूपतया नाभेदः। नवीनमते तु साध्याभावस्य व्यतिरेकव्याप्तिः।
३३ साध्यव्यापकाभावप्रतियोगित्वरूपेति नासाधारण्याभेदः। एतादृशव्याप्तिविशिष्टहेतुमज्ज्ञानं साध्यादनुमितिमति च प्र
कृतिनिषेधे पं॥ यस्य साध्याभावेत्यादि पक्षसंबंधि यत्साध्यं तदभावव्याप्यहेतुत्वं तस्य ज्ञानं यस्येति स सत्प्रतिपक्ष इत्य
र्थः॥ प्रकृतसाध्यव्याप्यत्वेन ज्ञायमानो यः प्रकृतहेतुः ततोऽन्यस्मिन्हेतौ साध्याभावव्याप्यत्वज्ञानदशायामेव तत्स्य
सत्प्रतिपक्षत्वेनेति सत्त्वनापत्तेस्त्वं नरसीति प्राचः॥ नवीनाः पुनरेवं वर्णयंति पक्षसंबंधिसाध्याभावव्याप्यहेतुत्वेन तस्य स
त्वं पक्षे सन्नधाविपक्षस्यार्थ इति। आश्रयासिद्धोपचरति। आश्रयासिद्धिश्च पक्षे पक्षतावच्छेदकविरहः पक्षताव
च्छेदकविरहवान्पक्षो वा। स च नास्त्येवेति। अरविंदस्य प्रसिद्धत्वात् सविशेषणे हीति न्यायेनारविंदे गगनीप ३३

त्वं नास्तीति पर्यवसितोऽर्थः । स्वरूपासिद्धिश्च पक्षे हेत्वभावः हेत्वभाववान्पक्षो वा । ननु सोपाधिकस्यातिरिक्तस्यपस
द्भावात्कथं पंचहेत्वाभासा इत्यत आह सोपाधिक इति । व्याप्यत्वासिद्धिः व्याप्त्यभावः तस्य सोपाधिके हेतौ नि
यमेन सत्वात् सोपाधिको व्याप्यत्वासिद्ध एव न त्वतिरिक्तो हेत्वाभास इति भावः । उपाधेर्दूषकत्वमसंभवीति दीपि
कायां व्यक्तो भविष्यत्यग्रे अत्रेदमवधेयं साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः हेतौ हेतुतावच्छेदकाभा
वः साधनाप्रसिद्धिः यथा काञ्चनमयपर्वतो वह्निमान्काञ्चनधूमादित्यादौ न च ह्रदशायां हेतुतावच्छेदकविशिष्टे सा
ध्यतावच्छेदकविशिष्टव्याप्तिग्रहप्रतिबंधः फलं तयोर्व्याप्यत्वासिद्धावंतर्भावात्कथं हेत्वाभासाधिक्यमिति साध्य
व्यापकत्व इति । साध्यव्यापकत्वं साधनाव्यापकत्वं एकरूपेण एकसंबंधेन च ग्राह्यं तेन वह्निमान्धूमादित्यादौ न तद्धे
वह्नित्वेन साध्यव्यापकत्वस्य तत्तद्वह्नित्वेन च साधनाव्यापकत्वस्य सत्वेपि आलोके संयोगेन साध्यव्यापकत्वस्य समवा

येन च साधनाव्यापकस्य सत्त्वे विनातिव्याप्तिः॥ मूले कोपाधिलक्षणस्याव्याप्तिं वारयितुं लक्षणभेदं प्रदर्शयति
उपाधिश्चतुर्विध इति। यद्धर्मविशिष्टसाध्यव्यापकत्वं तद्धर्मविशिष्टसाधनाव्यापकत्वं लक्षणे निवेशनीयम् अन्यथा
पर्वतत्वान्तकपक्षधर्मविशिष्टवन्हिव्यापकस्य कस्यचिद्धूमत्वावच्छिन्नाव्यापकत्वादतिव्याप्तिः स्यादिति ध्येयम्। उ
दासीनेति। पक्षधर्मसाधनाभ्यां भिन्नेत्यर्थः॥ वह्निर्द्रव्यत्वात्। आत्मान्यद्रव्यत्वमिदं केवलप्रमेयत्वस्येव साध्यता
नुसारेण। प्रागभावो विनाशी जन्यत्वादिति। अत्र जन्यत्वं पक्षधर्मो न भवतीति साधनावच्छिन्नसाध्यव्यापकत्वघ
टितलक्षणम्। अनित्यत्वव्यापकमिति। विनाशित्वव्यापकमित्यर्थः॥ व्यतिरेको दासीनत्वे संपादयितुं प्रमेयत्वादि
ति। बाधस्य। साध्याभाववत्तानिश्चयस्य। आभावनिश्चयत्वेनेति। अनभिमतिप्रतिबंधकत्वमित्यनेनान्वयः। अपि विरोधि
त्वान सामग्रीत्वेनेति। इदं प्राचीनमतेन। वस्तुतस्तु विरोधिविषयपरामर्शस्य साध्याभावव्याप्यवत्ताविषयत्वेनैव प्रतिबं ३५

धकत्वेलाघवात्। इतरेषां। व्यभिचारादिग्रहाणां। तत्रापि। व्यभिचारादिग्रहेष्वपि। साधारण्यस्येति। भावप्रधान
निर्देशात्तथा साधारण्यस्येत्यर्थः। अव्यभिचाराभावत्तथा। तद्ग्रहस्येतिशेषः। व्याप्तिज्ञानप्रतिबंधकत्वमि
त्यनेनान्वयः। एवमग्रेपि। हेतौ साध्याभाववद्वृत्तित्वस्यैव साध्यतावच्छेदके हेतुसमानाधिकरणात्यंताभा
वप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वे तथात्वं तद्ग्रहस्य हेतुसमानाधिकरणात्यंताभावप्रतियोगिता
वच्छेदकत्वाभावरूपो यो व्यभिचारः तद्ग्रहप्रतिबंधकत्वेनेति भावः। हेतौ साध्याभाववद्वृत्तित्वप्रकारकग्रह
स्य व्याप्तिग्रहप्रतिबंधकत्वं तु मणिमंत्रादिन्यायेन। विशिष्टव्याप्यभाववत्वं यो हेतुव्यापकतावच्छेदकसाध्य
तावच्छेदकावच्छिन्नसामानाधिकरण्याभावरूपस्तथा। व्याप्तिमत्त्वाद्याधायकत्वेनेति। हेतावसाध्यारोपादि।
ज्ञानदशायां हेतुसाध्ययोः सामानाधिकरण्यनिश्चयासंभवेन पक्षां ... तर्भावेण च साध्यसंशयसत्त्वेन व्या

दी॰पि॰प्र॰ मि संशयसंभवाद्व्याप्तिनिश्चयप्रतिप्राचीनमतमभिप्रेत्येदं। पक्षधर्मता ज्ञानप्रतिबंधकत्वमिति। पक्षे य स्सनाव
च्छेदकविरहस्य हेतुविरहस्य च निश्चयदशायां हेतौ पक्षसाध्याभावच्छेदकविशिष्टपक्षवृत्तित्वग्रहासंभवादिति भावः। न
३५ नु पक्षताेक्तिरसंगमाद्धेतावुपाधिग्रहदशायामपि व्याप्तिनिश्चयासंभवेनोपाधिज्ञानस्य व्याप्तिनिश्चयप्रतिबंधक
ताया अवश्यवक्तव्यत्वेनोपाधेरपि हेत्वाभासलक्षणाक्रान्तत्वादनन्तर्भाव आह उपाधिस्त्विति। व्यभिचारज्ञानद्वारेति। न
यावद्धेत्वाभासलक्षणे साक्षादनुमितितत्करणान्यतरप्रतिबंधकत्वस्यैव निवेशनीयतया परम्परया निश्चायकस्योपा
धेर्न हेत्वाभासत्वमिति भावः। ननु तथापि सिद्धिसत्त्वे ऽनुमित्यनुदयात्तद्विषयस्य साध्यवत्पक्षस्यापि हेत्वाभासत्व
मावश्यकमित्याशंकां निरस्यति पाधिकमनमनुकूलव्यापारापसापरिहरति सिद्धसाधनं त्विति। पक्षताविघटकतयेति। नन्व
तेपक्षतायाः साध्यसंशयरूपतया तद्विघटकत्वं साध्यनिश्चयस्यापक्षमिति भावः। अं नभ्यवसीति। नथ्याच्चनविभाग ३५

प्राधान्यमिति भावः। दर्शितमतमतिशिथिलमित्याशयेनाह दृतिग्रहेति। नन्वसिद्धांतोनुमितिमतिसिद्धेः प्रति बंधकत्वपा
नहि उपयस्य कथं हेत्वाभासतेति वाच्यं असिद्धावपि पक्षतायाः सिद्धिविरहनिवेशकृतस्यानुमत्वेन कृतत्वात्केवलसिषाधयिषा
सहितसिद्धेः प्रतिबंधकत्वाभावेन तद्विषयेऽहेत्वाभासलक्षणसत्त्वादिति। अधिकमस्मदीयाभिनवदीधितिव्या
ख्यायां तर्ककर्कशविचारचातुरीधुरीणैरनुसंधेयं॥ इति तर्कसंग्रहदीपिकाप्रकाशे भगवदर्पितेऽनुमानपरिच्छे
दः॥ श्रीगणेशाय नमः॥ उपमानं लक्षयतीति। अवसरसंगत्या उपमानं निरूपयतीत्यर्थः॥ उपमितिस्वरूपं व्युत्पा
दयति मूले संज्ञेति। संज्ञा गवयपदं। संज्ञी गवयः। तयोः संबंधः। शक्तिः। तज्ज्ञानमित्यर्थः। लक्षणं तूपमिनोमीत्यनु
व्यवसायगम्योपमितित्वमेवेति ध्येयं। गवार्थस्मरणेति। सादृश्यधीरिति यत्पदेति। एतेन स्मरणसादृश्यदर्शनजन्यमु
द्बोधकांतरजन्यं वा उभयमपि सादृश्यदर्शनस्य सहकारित्वमनुसादृश्यदर्शनजन्यमेव स्मरणं सहकारीति सूचितं

दीपि·प्र·

प्राचस्तु वाक्यार्थस्मरति अत्र वर्तमानसामीप्ये प्रत्ययः। वाक्यार्थं स्मरिष्यतीत्यर्थः॥ एवं च वाक्यार्थस्मरणस्य सादृ
३६ श्यदर्शनजन्यतालाभेन व्यापारतालाभ इत्याहुः तदनन्तरमित्यादिः। सादृश्यदर्शनानन्तरमेव योगवत्पदवाच्य इ
त्याकारिका गवयमतरूपफलस्य धर्मधर्मिणावच्छेदकोपमितिं निरूपयतीत्यर्थः। इदमुपलक्षणम्। वैधर्म्यदर्शनेना
प्युपमितिरिति ध्येयम्। वैशेषिकास्तु पदवाच्यत्वव्याप्यसादृश्यादिपरामर्शात्पदवाच्यत्वस्यानुमितिरेवातो नो
पमानं प्रमाणान्तरमित्याहुः। तच्चिन्त्यं व्याप्तिज्ञानमन्तरापि पदवाच्यत्वप्रमितेरनुभवसिद्धत्वादित्यन्यत्र विस्तरः। इति
तर्कसंग्रहदीपिकाप्रकाशे भगवद्दर्पितेऽपमानपरिच्छेदः॥ श्रीदक्षिणामूर्तये नमः॥ शब्दं लक्षयन्निति। उप
जीव्योपजीवकभावसंगत्या शब्दं निरूपयतीत्यर्थः। अत्र उपमानशब्दस्य शब्दप्रमाणत्वात् शब्दे उपमानो
पजीवकत्वाभावादुपमितिशाब्दबोधरूपफलयोः संगतिर्बोध्या। तथा हि शक्तिपरिच्छित्तिरेवोपमितिः तस्याश्च ३६

शाब्दबोधेपि जीवत्वेन फलयोरुपजीव्योपजीवकत्वसंभवः। तादृशसंगतेश्च फलनिष्ठत्वेपि स्वाश्रयकरणत्वात्मकप
रंपरासंबंधेन करणनिष्ठत्वात्करणयोरनंतराभिधानप्रयोजकत्वं। शब्दज्ञानस्य प्रमाणत्वांगीकर्तॄन्नवीनमतेनेनू
पमितेः शक्तपदविषयकत्वेन शब्दप्रमाणानंतरानंतत्रैवोपमानजन्यत्वस्यावश्यकत्वेनपाठस्वरूपयोरपि संगतिरितिमं
तव्यं। मूले आप्तवाक्यं शब्द इति। शब्द इति लक्ष्यनिर्देशः। प्रमाणशब्द इत्यर्थः। आप्तवाक्यमिति लक्षणं। भवति
हि पयसा सिंचतीत्यादिशब्दः आप्तोक्तवाक्यं ननु वह्निना सिंचतीत्यादिशब्दः तदुच्चारणकर्तुः यथार्थवक्तृत्वरूपा
प्तत्वाभावान्न प्रकृतलक्षणाक्रान्तः। आप्तस्य यथार्थज्ञानजन्यवाक्यं प्रमाणशब्द इति तु निष्कर्षः। वाक्यप्रयोगे वाक्यार्थ
ज्ञानस्य हेतुत्वाल्लक्षणसंगतिः। स्फुटमेतच्च प्रमाणामीमांसकमतनिरासकत्वेनाग्निमग्रन्थमवतारयितुं त
न्मतस्याधारणेन शक्तिपदार्थमाह अर्थस्मृत्यनुकूले इति। शाब्दबोधजनकार्थस्मृत्यनुकूलो घटादिपदघटादि

दी·वि·प्र·
३८

रूपार्थयोः संबंधः शक्तिरित्यर्थः ॥ अनुकूलत्वमिह प्रयोजकत्वेन तत्कारणतावच्छेदकं पदपदार्थसंबंधेऽप्यस्ति। घटा
दिपदतदर्थयोरन्यसंबंधवारणायानुकूलांतं विवक्षितार्थकं अन्यसंबंधज्ञानस्यार्थस्मृतिजनकत्वेपि शाब्दबोध
जनकस्मृतिजनकत्वाभावात् ॥ अर्थस्मृत्यनुपदार्थत्वस्याप्रमितेः प्रसिद्धत्वेपि न बाधा इति ॥ अस्मात्पदादयमि
त्यादिमूलमप्येतन्मतं दृष्टं न्यायबोधविषयो पमर्थ इत्याकारकस्वरेच्छा शक्तिरित्यर्थः ॥ ननु पदार्थान्तरमिति ॥ नव्येश्वरी
परेच्छातस्य इच्छायाः कर्तव्यता शक्तिरूपत्वमिति विनिगमनाविरहादिति केवलं शक्तिरिति वाच्यं ॥ आधुनिकसंकेतस्ये
च्छारूपतया शक्तेरपीच्छारूपत्वे संकेतज्ञानस्यानुगतकारणभावः संभवति नान्यथेत्येवं विनिगमकसंभवेन
च्छाया एव शक्तित्वस्वीकारेण न च भगवदिच्छायाः सकलविषयिण्याः शक्तित्वस्वीकारे घटपदं बोध्यत्वप्र
कारकेनेच्छायाः पटेपि सत्त्वात् घटपदस्य वाच्यत्वस्यातिप्रसंगः एवं अमुमर्थं पदस्य बोधविषयत्वप्रकारकेच्छायाः शक्ती ३८

रपि सत्वेन शक्तौ वनदोषसंभवे तत्स्वरूपाे बोधे दोषापत्तिरिति वाच्यं यतः तत्तत्पदजन्यत्वेन तत्पदजन्यबोधविषयत्वप्रकारता
निरूपितेश्वरेच्छीयविशेष्यतावत्वं तादृशप्रकारतानिरूपितविशेष्यतासंबंधेनेश्वरेच्छावत्वं वा न याव तादृशस्य घटपदवा
च्यत्वस्य पटे। सत्तान्जातिप्रसंगः। गंगादिपदजन्यत्वस्य बोधांशे बोधविषयत्वस्य चेती रांशे सत्वात् अन्यथा नमीश्वरेच्छा
पाकुपेयत्तेरस्य च विशकलितमानस्य लेनिरूपनिरूपकभावापन्नविषयताया अभावेन गंगादिपदजन्यत्वप्रकार
तानिरूपितबोधविषयतानिरूपितविषयत्वप्रकारतानिरूपितविशेष्यतासंबंधेनेच्छावत्वस्य तीरे सत्वेन तत्र शक्ति
रिति संक्षेपः। विशिष्टे शक्तिं व्यवस्थापयितुमीमांसकमतमुपन्यस्य दूषयति गवादीत्यादिना विशेषणमत्र जा
तिग्रहमन्तरा विशिष्टग्रहासंभवेन विशिष्टे शक्तिकल्पनं न संभवति अतः जातिग्रहस्य प्रथममपेक्षितत्वे जाता
वेव शक्तिकल्पनमुचितं लाघवादित्याह विशेषणानपेक्षितप्रथममुपस्थितत्वादिति। विशिष्टग्रहात्पूर्वमवगत

त्वादित्यर्थः। कथं तर्हि व्यक्तिलाभ इत्यत आह व्यक्तीति। आक्षेपादिति। अर्थापत्तिप्रमाणादित्यर्थः। व्यक्त्यभावे बसंभवेने
ति· अनुपपत्तिसंधानभूयस्तादृशायामपि व्यक्तिभानस्यानुभवसिद्धत्वेन चेत्यपि बोध्यं विशिष्टव्यक्त्याववेति। एवं का
रणाके वलजातिशक्तिकल्पनव्यवच्छेदः। अत्रेदं बोध्यं जातितद्वैशिष्ट्यानदास्वनयेषु त्रिषु शक्तिः कल्पनीया पदार्थह
पसंबंधस्यैव पदद्वयसमभिव्याहारलभ्यत्वेनान्यसपात्रा कासय शाब्दबोधे भानासंभवादिति। नव्यासुलस्यतावच्छेदक
त्वग्रहमात्रेण लक्ष्यतावच्छेदकस्य यथा शाब्दबोधे भानं तथा शक्यतावच्छेदकत्वग्रहमात्रेण शक्यतावच्छेदकस्य शा
ब्दबोधे भानं संभवतीति शक्यतावच्छेदके न शक्तिर्न कल्पनीयेति वदंति। शक्तिग्रहस्य वृद्धव्यवहारेणेति। शक्तिग्र
हो वृद्धव्यवहारेण भवतीत्यर्थः। चेन व्याकरणादिपरिग्रहः। अत एव शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्या
द्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः इत्यभियुक्तोक्तिः संगच्छते व्याकरणात्सम १८

ानिप्रसयादिवाक्याच्छक्तिग्रहः उपमानाद्यथा किमत्र स्तु अधस्तादर्थिनः अप्येकदंतहेरंबलंबोदरगजाननाः इति कोशादेक
दंतादिशब्दाः गणेशत्वविशिष्टे शक्ताः इत्यर्थकाद्गणेशत्वविशिष्टे शक्तिग्रहः। तत्र एकदंतादिशब्दानामेव यद
र्थेनयानेषां विभिन्नत्वेन द्वंद्वोपपत्तिः। कोकिलः पिकवाच्य इत्याप्तवाक्यात् पिकशब्दस्य कोकिले शक्तिग्रहः। व्यवहार
तः शक्तिग्रहमुपपादयति प्रसिद्धसिद्धेति शक्तिग्रहे हेतुव्यवहारानित्यर्थः उत्तमवृद्धेति प्रयोजकवृद्धेत्यर्थः। मध्यमवृद्धस्येति
प्रयोज्यवृद्धस्येत्यर्थः। गवानयनेहत्वा प्रवृत्तिमुपलभ्यैवेतन्वयः। उपलभ्ये न्यस्यानुमापेत्यर्थः। इत्येकिपाप्रपत्तपूर्वि
लक्षणक्रियात्वाज्ञानमीपक्रियावदित्यनुमानप्रयोगो बोध्यः। प्रवृत्तिजनकज्ञानस्य। घटान्यपनगोबंधनततनकुध
टानयनतानस्य। वाक्यस्यविशिष्टेः। वैशाद्धिर्नेकस्यनीपाः नाहृशार्थस्यसमभिव्याहारलभ्यत्वानन्वयनसलभ्यो
हि शार्थ इतिन्यायादित्यमिसविमानाहश्राविमानपेत्यादि। आवापोद्वापाभ्यामिति। आवापः। संग्रहः। उद्वापः।

दी॰कि॰प्र॰
३९

त्मनः॥ व्युत्पन्नघनइति॥ अत्यन्तमाश्च पोभवतीत्यर्थः॥ वा असेषा धर्मार्थवमय स्वरूभेव नीलपत्रपवशब्दः॥ आर्षवृक्षवहारादीर्घश्रक
विशिष्टस्यवाचकः॥ म्लेच्छ व्यवहारात्कंगोर्वा चके॥ वेनिसंदेहेववसंतेभर्वसस्यानकुमापतेप त्रशाततनमोदमाना श्वनिषं निपवाः
कुणि शशालिनइति वास्मशेषा रीर्द शकावि शिषेश्मिनि नर्गम्यः॥ कोत्तुशा किंभूमात्मयाः॥ विवसणाद्य धावप वद्भिपा
कं कुरो तीतिपलार्थेवकं रातिनात्सर्वोव्याकान आख्यानादाख्य नस्पष्ठ अत्वविशिष्टेनाकिंश्रहः॥ मिरूपदमान्निधान्यकिन
हस्तुविध शिनपद्मेर स्याघ्रिमंत्र वरव स्मुटीभवि व्याती समं चपरश्चे वितेन॥ अवतारस्य कार्यपल्लवादिनिषेधनना कार्यपव
रत्वं व सनिमा द्यानय नादि रूपाद्ये यानास्यपेक्ते व्युत्सितिः॥ शक्किमहः॥ अनवें धसु उपानिनमिरे नि॥ धिरे पिव
वहात्व रिति॥ न द्यासिरे रुपिशा किंमर त्यावधाकः॥ मन्यधानवानुभवेसिद्धस्य श्राद्ध वेध स्वापनपाप वरिति मा
वः ल धवादिपरानाना नार्थवत्तानुपपत्तिः॥ एवंवशान्निरन्यवलस सोत्तेवहि सोवनि र्थहंरनवाप्रसंध कारा

३९

विति आदिना सूर्यादिपदस्य परिग्रहः ॥ संबंधाभावादिति संयोगादिरूपसंबंधाभावादित्यर्थः ॥ इदमुपलक्षणं प्रसिद्धयो रर्थयो ॥ कु
त्रशक्तिः ॥ कुत्र लक्षणोत्पत्त्यविनिगमकाभावेनो भयत्र शक्ति कल्पनस्यावश्यकत्वात् ॥ मंचाइति ॥ मंचपदं मंचस्थपुरुषलाक्षणिकं वाच्यार्थस्याक्रोशनकर्तृत्वान्वयासंभवादिति भावः ॥ वाच्यस्यापीति ॥ अपिना तीरेऽपि शक्तिर्न कल्प्यतइति गंगापदस्येति शेषः ॥ नचैवं लक्ष्यसमुच्चयः ॥ छत्रिणइति ॥ अत्र एकसार्थवाहित्वेन छत्र्यछत्रिषु गमनकर्तृत्वान्वयतात्पर्यानुपपत्तिरेव लक्षणाबीजं ॥ नवच्छिन्नत्वस्यमनुवर्थके अन्यथानन्नयापदसमूहरूपत्वेन न च काप्रसिद्ध्याशक्यसंबंधरूपलक्षणाया अभावेन कथमिदमुदाहरणमिति वाच्यं प्रतिपाद्यसंबंधरावलक्षणोक्तेन तदभिप्रायेणानुदाहरणादानात् अन्यथा काकेभ्यो दधिरक्ष्यतामित्यादावुदाहृतव्यंतत्रकाकपदस्य काकतदितरसाधारणदध्युपघातकत्वावच्छिन्नपरत्वानवकं चित्तुछत्रपदस्यैवैकसार्थलक्षणात् तद्दिनार्थसंबंधीनयत्यैकसार्थसंभिन्नागच्छतीत्यन्वयबोधरत्वा

दीपि·प्र· रूः॥ तत्त्वमसीति। अत्र तत्पदार्थस्य सर्वज्ञत्वादिविशिष्टे त्वंपदार्थस्यांतःकरणादिविशिष्टस्याभेदान्वयानुपपत्त्योभयत्र वि
८० शेषणांशपरित्यागः। न चायं तत्पदलक्ष्यस्य शुद्धस्य त्वंपदलक्ष्येणाभेदान्वयोपपत्तिरित्यभिप्रायः। इदमुदाहरण
णं वक्रस्मारिरीत्यां तुष्यतु न्यायेनाद्वैतवादिनां सिद्धांताभिप्रायेण नैयायिकमतेन स्यासंमतत्वात्। नैयायिकरीत्या तु सो
ऽयं देवदत्त इत्यादौ तत्तांशस्येदानीमसंभवात् हानं इदंतांशस्यासंभवाद्धानमिति जहदजहल्लक्षणामाचक्षते परे तु
घटो नित्य इत्यादौ घटत्वस्येव सोऽयं देवदत्त इत्यादौ न तांशस्योपलक्षणत्वमपाम्नेन किंचिद्धानमिति किं जहद
जहल्लक्षणयेति वदंति। गौणपाः हृत्पत्तरत्वेनिर्णाचवैगौणपपीति। ननु गंगायां घोष इत्यत्र तीरे शैत्यपावनस्य प्रवाहस्येव
प्ति मरणाकुक इत्यादौ माणवके शौर्यस्याग्नेः साक्षात्संबंधेन संभवतीति कथं लक्षणा प्रयोजननिर्वाहक इत्यत आह लक्ष्यमाणे
ति। लक्ष्यमाणगुणयोगेन वृत्तिरित्यादिः। तत्संबंधरूपत्वमर्थः। अयमभिप्रायः शक्यसंबंधो हि लक्षणा स च वक्तासांतं ८०

वंधः॥ नूवित्थरंपरासंबंधः॥ एवंचशक्यस्याग्नेः स्वनिष्ठशाविलवत्त्वमेवसंबंधोलक्षणेति प्राप्तलंकादिकाः पुनरेवमाहुः तीरेघो
षइतित्रलक्षणायोगेत्वावतेगंगायांघोषइत्यनन्विताभिधानंतयावक्तव्यादिप्रतीत्यर्थमेवसाप्रतीतिर्लक्षणयापपद्यतेवे
वलतीरलक्षणयेवान्वयानुपपत्तिपरिहारेशैत्यपावनत्वादिविशिष्टलक्षणायामभावाभावान्तस्मात्व्यंजनावृत्तिरेवशैप
मंगीकर्तव्यमितिनव्यमतंनिरस्यतिव्यंजनापीति॥शक्तिलक्षणातन्मूलेति अपभावः नानार्थवस्थलेहरस्याम् धामस्यामुल्ला
दौमुख्यार्थकेनपर्वतानामित्यादौतामपिशक्तेवप्रतीतिःसंभवतिगंगायांघोषइत्यादौतुशैत्यपावनत्वादिविशिष्टतीरप्र
तीतिरपिलक्षणासाध्याप्यादेवतत्रलक्षणात्मकल्पिकायाः तात्पर्यानुपपत्तेरेवसद्भावात्किमर्थंतिरिक्तव्यंजनयेति न
नुशब्दशक्तिमूलायाव्यंजनायाः अन्यथासिद्धत्वेपि अर्थशक्तिमूलायाः तस्यानान्यथासिद्धिः॥तथाहि गच्छग
च्छसिचेत्कांतपंथानस्संतुतेशिवाः ममापितज्जन्मैवभूयाद्यत्रगतोभवानित्यादौहेप्रियत्वगमनोत्संममा

दीपि·प्र· वियोगो भविष्यतीति अतो न गंतव्यमित्याद्यर्थोऽपपद्यते ॰ न सह्यन्त्रा किल सहशाणाभ्यानि वाहैः इत्यत्र व्यंजनापाऽस्यावश्यकते
स्यत आह अर्थश क्तिमूलावेति । वस्तुत्वे । अनुमानादिनेति अनुमानप्रकारस्तु इयं मदीयगमनीजलकान्तिकमारा
८१ वियोगवती विलसरणशरप्रयोक्त्रीत्वादित्यादिरूपः आदिना संभावनादिपरिग्रहः ॥ ठक्तदैकैतरकोटिक संश
पः संभवना ॰ औत्कण्ठ्यं च विषयना विशेष ॥ यदि तु नरमनुभाविकोत्तैौकाना लरसवाही ज्ञाप्य दनमर्थं प्रत्ययमीत्यनु
भवस्तदा वैयंजनिकी प्रतीतिर्गीवाराणगुरूणामप्यपराकावाऽस्ता तिव्यंजनासिद्धिरप्रत्यूहैवेति मतं । अन्वयानुप
पत्तेर्लक्षणाबीजत्वे य इति ॥ अवैशाये त्यादौ लक्षणानुपपत्तिः तात्पर्यानुपपत्तेलक्षणाबीजत्वेन तस्यास्तुत्रापि सत्वे
न यूपिष्यदस्य याविधरेलक्षणासंभवतीत्याशयेनाह तात्पर्यानुपपत्तिरितीति । तन्मतीति । तीरादिरूपार्थप्रतीती
त्यर्थः । नानार्थेति । सैंधवमानयेत्यादिनानार्थकस्थले सैंधवपदस्याश्वलवणान्यतरशक्तेऽनुत्पन्नयाऽशग्रहवाधेनान्य ८१

र्थग्रहस्य कारणत्वमंतरा न निष्पन्नकालनंतरबोधोपपत्तिरिति तत्र तत्कारणात्तस्यावश्यकत्वे तदनुरोधेन सर्वत्र तदावश्यक
कत्वेति भावः । नच मैनिक्लेकादौ शाब्दबोधानुपपत्तिः तत्र निरूढनाम्नर्थस्याप्रसत्त्वादिति वाच्यं तात्पर्यस्य तत्प्रती
तीच्छारूपत्वपर्यवसानेन नव्यतादृशतात्पर्यसत्त्वेन दोषाभावात् तथापि तत्प्रतीतीच्छारहितशुकाद्युच्चारितवाक्याद्
त्ति शाब्दबोधस्यानुभविकत्वापात तत्रानुपपत्तेः परिहारसंभवकल्पितं सत्त्वे शुकवरीयेच्छायाः दोषेवानुपपत्तेः परिहारसं
भवादित्यलमनल्पजल्पनेन । प्रकरणादिकमित्यादिना सशस्त्रकाकोहरिः कृष्णपरस्यादौ हरिशब्दस्य भगवति तात्प
र्यनिर्णायकस्य सच्चाश्वत्वस्य इति विशेषप्रसादः परिग्रहः । कथं प्रकरणादेस्तात्पर्यग्राहकत्वमिति चेदित्थं । सैन्धव
पदस्य लवणबोधेच्छयोच्चरितं भोजनप्रकरणोपन्यस्तत्वादित्यादिरीत्या ग्रहणम् ॥ प्राभाकरमतं निराकरिष्यमाणः स्वसि
द्धान्तं प्रदर्शयति दूरमिति । अर्थस्तात्पर्यत्वाभावादसेति । शब्दतात्पर्यस्यार्थतात्पर्यमूलकत्वादित्यर्थः । एतावता प्रथममत

दीपि. प्र. वार्थानुसंधानेनतात्पर्यमितिसंप्रविनं । किंवार्थबुध्या वाक्यरचनेति न्यायेनार्थज्ञानमंतराआकांक्षितशब्दानुसंधानरूप
शब्दाध्याहारस्यैवासंभवेन प्रथमतोर्थाध्याहारस्यैवावश्यकत्वेनाध्याहार्थमपीति । यथाकथंचिदुपस्थितपदार्थानां
८२ शाब्दबोधानुदयेन पदजन्यत्वस्योपस्थितिविशेषणतायाआवश्यकतयानाहशोपस्थितिसंपत्येशब्दाध्याहारार
वानायपा । नुसर्तव्यइत्याहपदविशेषेति । विशेषणंयदस्यापिप्रयोजनंनदर्शयितुंघटःकर्मत्वमित्याद्यनुधावनं । तत्रक
र्मत्वादिपदजन्यकर्मत्वाद्युपस्थितेः सत्त्वेपि घटपदोत्तरमादिपदजन्यकर्मत्वाद्युपस्थितेरसत्त्वेन न संक्रांतिमतेः शाब्द
बोधप्रसंगइत्तिभावः । पदविशेषणजन्यत्वस्यतत्त्यापदविशेषजन्यस्यापिविशेषणे नघटमानयेत्यादौघटादिपदादाकाशा
द्युपस्थितावपिनशाब्दबोधइतिदिक् । यद्यपिपदंचतुर्विधंयोगिकरूढयोगरूढंयोगिकरूढंचेति । योगोवय
वशक्तिः तन्मात्रेणार्थप्रतिपादकंयथापाचकादिपदं । रूढिः समुदायशक्तिः तन्मात्रेणार्थप्रतिपादकंडि ८२

यंच यौगत्वादिपदं।योगरूढिभ्यां परस्परसहकारेणार्थप्रतिपादकं तत्तृतीयं यथा पंकजादि यद्यौगिकं च तद्रूढं चेति व्युत्पत्त्या
योगेन परस्परसहकारेणार्थप्रतिपादकं च तुर्थं यथा उद्भिदं।योगेन तरुगुल्मादे रूढ्या तु यागविशेषस्य वाचकं तथा
पि योगरूढत्वाद्रूढ्यं तत्र योगरूढयोः स्वरूपमदर्शनेन तदुदाहरणं त्वत्रापि योरूढशब्दमभिसंधायैव पंकजादिपदे योगरूढत्वं प्रद
र्शयति पंकजादीति।योगरूढिहरीति।योगसहिता रूढिरित्यर्थः ननु पंकजादिशब्देष्वपि योग एवास्तु तावतैव निर्वाहादित्या
शंक्याह पंकजशब्दस्य पद्मत्वावच्छिन्ने शक्तिमन्तराणि पंकजनिकर्तृत्वावच्छिन्नभानमनुभवसिद्धं न निर्वहतीति पद्मत्वावच्छिन्ने शक्ति
रावश्यकेत्याह निपतेति।निपत्तपद्मत्वावच्छिन्नभानानुभवे विप्रतिपत्त्रेतत्याह स्यन्यथेति निपत्तपद्मत्वावच्छिन्नभानो
पयोगिसमुदायशक्त्यं नंगीकार्यत्यर्थः।प्रयोगेति।पंकजपदप्रयोगस्यार्थः यद्यपि कायान्वितेशक्तिरिति प्राभाकरम
तं न यथापि सिद्धार्थपरवाक्ये व्युत्पत्ते र्वक्ष्यमाणत्वेन तत्साधारण्यापत्तेस्तन्मतं परिष्कृत्य दर्शयति इतरान्वितशक्ति

टी॰ पि॰ प्र॰ आन्वितेशक्तिरितितन्निष्कर्षः ॥ अयमभिप्रायः कथंचिदुपस्थितपदार्थानां शाब्दबोधकारणता यत्तत्तद्विषयकशाब्दबोधं प्र
ति वृत्तिज्ञानजन्यतदुपस्थितित्वेन हेतुतायाः कल्पनीयतयाऽन्वयांशेऽपि शक्तिरपेक्षिता अन्यथा तादृशसामान्यकार्य
५३ कारणभावभंगापत्तेः न च संसर्गविषयताभिन्नतत्तद्विषयताशालिशाब्दबोधं प्रति वृत्तिज्ञानाधीनतत्तदुपस्थितित्वेन हेतु
त्वमास्तां तथा च अन्वयांशे शक्त्यनंगीकारेऽपि न क्षतिरिति वाच्यं तथा सति कार्यतावच्छेदकगौरवापत्तेः एवं चान्वितो घटो घट
पदवाच्यत्वरूपाकारकशक्तिज्ञानमेव शाब्दबोधप्रयोजकमिति। केचित्तु इतरान्वितेशक्तिरित्यस्य कार्यान्वितेशक्तिरित्यर्थ
माहुः ॥ सयुक्तिकं नैयायिकमतं दर्शयति। अन्वयस्येति। पदार्थसंसर्गस्य पदसमभिव्याहारवशादेव शाब्दबोधे भानसंभ
वात्तादृशसंसर्गांशेऽपि शक्तिर्न कल्पनीयेति समुदितार्थनिष्कर्षः ॥ अयमाशयः तद्विषयकशाब्दबुद्धिं प्रति वृत्तिज्ञानाधीन
तदुपस्थितित्वेनानुगतकारणभावेन संभवति शक्तिलक्षणोभयसाधारण्यस्य वृत्तित्वस्य लघुभूतस्य दुर्वचत्वात् तथापि तु सं ५३

केनत्रहार्थानन दुपस्थितित्वेनैका कारणता जक्षणाज्ञानजन्यतदुपस्थितित्वेनत्वा पराकारणता वाच्यी कर्त्तव्या : परस्परजनने दुपस्थि
तिजन्यशाब्दबोधे व्यभिचारवारणाय च तत्तत्कारणताव्यवहितोत्तरत्वं तत्तत्कारणताजन्यतावच्छेदककोटौ निवेशनीयं एवं बह
त्यनुपस्थापितस्यापि परार्थद्वयसंसर्गस्य शाब्दबोधोपगमे व्यभिचारात् प्रसक्त्या दर्शितदिशा विधेकार्यकारणभावस्य निष्प्रत्यूहत्वे
ऽपि मन्वयांशे शक्तिकल्पनेन ॥ आकांक्षादिरहितपदसमुदायाच्छाब्दबोधवारणाय आकांक्षादेः शाब्दबोधहेतुत्वमभिहितं मूल
कृता तच्च नवीनमते न निर्वहतीति तज्ज्ञानस्य हेतुतामाह ॥ आकांक्षादिज्ञानमिति। आदिना योग्यतापरिग्रहः। आसत्त्या आ
कांक्षादेः शाब्दधीहेतुत्वे। घटमानयेत्यादौ घटपदस्य यत्पदाभावप्रयुक्तमन्वयबोधाजनकत्वं तत्पदसमभिव्याहृततत्पदत्व
मा कांक्षेत्यर्थः। अयुक्तत्वं च कारणाभावात्कार्याभाव इति प्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः। अजनकत्वांतं परिष्कार्य एकं
।एकपदार्थे परपदार्थवत्त्वं योग्यतेति मते संशयनिश्चयसाधारणं तज्ज्ञानत्वावच्छिन्नं शाब्दधीहेतुः बाधनिश्चयाभावो यो

दीपि-प्र

५८ ग्पत्तेत्तिनवीनमतेतुस्वरूपसत्येवयोग्पत्तानदेतुरीतिरिति। मीमांसकः शंकतेनन्विति। वेदस्यपौरुषेयत्वमनुमानेनवस्या
पपत्तिवक्ष्यति। नन्वष्टादशपुराणानांकर्त्तृसिमवतीत्यतःस्मादिप्रमाणवलेनभारतादौकर्त्तृमुपलभ्यतेनहितथावेदे। न
यावस्मर्यमाणकर्त्तृकत्वस्यभारतादौसाध्यव्यापकत्वात्पक्षेसाधनाव्यापकत्वादुपाधित्वेनकथमिदमनुमानंसाध्यसा
धकंभवेदित्याशंकतेनन्वेति। गौतमादिभिःशिष्यपरंपरयावेदकर्त्तुरुपदेशविवदंतःप्रसाहननस्मानेत्पानादिति। नपः
कृतवत्तईश्वरादित्यर्थः। नपवानोर्लिंगःकानजादेर्योगत्वाभ्यासतोयथोर्निष्पन्नेतत्पानेति। सस्वायंगकारइतीति
अत्रैतत्कालिकगकारपूर्वकालिकगकारयोर्भेदाभासतेतस्यवर्णानामनित्यत्वेनसंभवतीतिभावः। अनित्यत्वादि
ति। तर्हिप्रत्यभिज्ञाविरोधइत्यतआहसोयमिति। उत्पत्तिविनाशप्रत्ययोरन्यार्थकत्वेकल्पनामपेक्ष्येतत्प्रत्यस्यतथा
त्वकल्पनेलाघवमितितद्वया। अथमीमांसकमादावानुपूर्वीत्यकारोन्नरगकारोन्नरत्वादिरूपानत्रोत्तरत्वमभवहितोत्तरत्व ५८

रागद्वेषादिरूपं वाच्यमित्यर्थः वर्णानां नित्यत्वांगीकारेऽपि अनित्यसूत्रघटितायाआनुपूर्व्या अनित्यत्वात्तद्विशिष्टवाक्य
कासमुदायात्मकवेदस्यत्वदभिमतनित्यत्वं नो सिध्यतीति वर्णानामनित्यत्वमेवोचितमित्याह वर्णानामिति यद्यपि
स्मृत्यादीनामाप्तोक्तत्वादेव प्रमाणत्वं सिध्यति तत्कर्तृमन्वादीनामाप्तत्वात् । तथापि तेषामाप्तत्वे विप्रतिपत्तेः प्र
त्याह मन्वादीनि । अप्रतारणामिति । आचारप्रतिपादकशिष्टवाक्यानामित्यर्थः । एतेन प्रमाणविभागव्याघाताशं
का निरस्ता । वेदार्थं ज्ञात्वैव मन्वादिभिः तदर्थकस्मृत्यादीनि निर्मितानि अतः तेषां प्रामाण्यमिति मनसि कृत्याह वे
दमूलकत्वेनेति । ननु तर्हि सर्ववेदः कुतो नोपलभ्यत इत्यत आह स्मृतिमूलेति । तन्मूलभूतेत्यादि । स्मृत्यादिमूल
भूता काचिच्छाखा पाठतः परिभ्रष्टेत्यनुमीयत इत्यर्थः । वा मीमांसकस्य । वाक्योच्छेदस्य अनुसमानानुपूर्वीक
वेदपाठस्य संप्रदायसिद्धत्वात्तादृशावेदैकत्वेपि पञ्चवाक्योच्छेदस्य कल्पयितुमशक्यत्वेपि पद्यमानवेदस्य वविशाकल्पि

दी.पि.प्र
८५

तत्रपाविद्यमानवाक्यानांसन्निमत्त्वमस्तीत्यत आह विप्रकीर्णेति। अयुक्तत्वादिति। समत्वादिसमानार्थकवाक्यानां
पद्यमानवेदे। नुपलंभादिति भावः। नित्यानुमेयइति। नित्यमनुमेयइत्यर्थः। वर्णानुपूर्वीज्ञानाभावेनेति। तादृशज्ञा
नस्यापिशाब्दबोधहेतुत्वादन्यथानदीनादिशब्देर्थविशेषबोधानापत्तेरितिभावः। शाब्दस्यप्रत्यक्षप्रमाणत्वमं
गीकुर्वतांवैशेषिकाणांमतेदूषयितुमुपन्यस्यतिनन्वेतानीत्यादिना। एतानिपदानि। घटमानयेत्यादीनिपदानि।
स्मारितार्थसंसर्गवन्तीति। स्मारितार्थसंसर्गज्ञानपूर्वकाणीत्यर्थः। संसर्गतात्पर्यविषयत्वनिवेशकीर्तनेनसं
सर्गान्तरमादायनार्थान्तरता। आकांक्षादीत्यादिनायोग्यतासत्त्योः परिग्रहः। आकांक्षादिरहितेतपदकदंब
केव्यभिचारवारणायाकांक्षादीति। सर्वसमन्त्वादिति। तथाचकार्यवैलक्षण्याननुरोधेनशब्दः प्रमाणान्तरमि
तिभावः। मीमांसकः शंकतेनन्वर्थेति। द्विवानमुद्रेः इत्यर्थः। इष्टेप्रसमक्षतानोज्ञानोत्पत्तौशाब्दाज्ञानतोएतेनदृष्टार्थी ८५

पत्तिः श्रुतार्थापत्तिश्चेत्यर्थापत्तेर्द्वैविध्यं सूचितं। पीनत्वान्यथानुपपत्त्येति। पीनत्वस्य रात्रिभोजनं विनाऽनुपपत्त्येत्यर्थः
।अत्रेदमवधेयं यद्विनाऽयदनुपपन्नं तत्तदुपपादकमिति। रात्रिभोजनमुपपादकं। पीनत्वमुपपाद्यं। उपपादकज्ञानं फलं
उपपाद्यज्ञानं करणं। फलकरणयोरुभयोरर्थापत्तिशब्दो वर्त्तते। फले अर्थस्यापत्तिः कल्पनेति व्युत्पत्त्या करणे तु
अर्थस्यापत्तिः कल्पना यस्मादिति व्युत्पत्त्येति॥ व्यतिरेक्यनुमानेनैव गतार्थत्वादर्थापत्तेः प्रमाणान्तरत्वमनुचितमिति
समाधत्ते देवदत्त इति। दिवामात्रभोजिनि पीने व्यभिचारवारणाय हेतौ सत्यन्तं। अहोरात्राभोजिन्यपीने व्यभिचारवार
णाय विशेष्यं योगाद्यजन्यपीनत्वपरं। तेन भोजनशून्ये योगिनि पीने न व्यभिचारः। संभवैतिह्ययोरतिरिक्तप्रमाणत्वं
वदतां पौराणिकानां मतं दूषयति शते पंचाशदित्यादिना। अनुमानभेदानन्तु प्रमाणान्तरत्वमित्यर्थः। ज्ञातत्वानि शते
पंचाशद्वानिति ज्ञानं भवति तस्यानुमानेनैव निर्वाहात् शतस्य पंचाशद्व्याप्यत्वादिति भावः। अज्ञानमक्तेति वि

शिक्षया निश्चितप्रथमवक्तृकः शब्दः नतु प्रमाणान्तरमित्यर्थः। नादृशशब्दस्य यथार्थत्वं शब्दप्रमाणमध्ये। तर्हिवः अन्यथात्व
प्रामाण्यमेवेति हृदयं। नन्वनया चेष्टया ऽयमर्थो बोद्धव्य इति समकेतिकचेष्टया किंजातीयप्रमाजननाच्चेष्टापि प्रमाणान्तर
मिति वदन्तं निरस्यति वेषापीति। शाब्दानुमानद्वारेति। शब्दद्वारा ऽनुमानद्वारा वानानुसात्तद्योगात्यर्थः। वेषया कल्पितस्य
शब्दस्य प्रमायकल्पे गौरवादनुमानानुसरणव्यवहारेति। प्रमानमकत्तान्तेत्यर्थः। उपसंहरति तस्मादिति। इति शब्दप
रिच्छेदः। प्रमाणध्वंसगातप्रमात्वस्य परतो ग्राह्यत्वं व्यवस्थापयिष्यन्नाहलानामिति। बस्यर्थः साधयति। तस्य वान्यपत्त
द्वितीत्प्रकारकत्वे तद्वतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्व तच्छब्दार्थः घटत्वादिरूपप्रकारस्वतो ग्राह्यमिति। ज्ञान
ग्राहकसामग्रीजन्यत्व हविषय इत्यर्थः। परत इति ग्राह्यमित्यनुवर्त्यते। अनुमानादिजन्यत्व हविषय इति तद
र्थः। तत्राविचारे प्रयोजकत्वसमस्यार्थः। विप्रतिपत्तव्येति। कथं तस्याः विचारप्रयोजकत्वमिति वेदव्य नन्देति विरु ५६

दार्थप्रतिपादकवाक्यद्वयं हि विप्रतिपत्तिः तया प्रामाण्यं परशंकाकवलितं तत्तद्वादिसार्थे तोऽवधारणप्रसक्तस्य संशयो ज
न्यतइसंस्कत्तरकाले निश्चयाय न्यायप्रयोगादिरूपो विचारः एवं चाविचारोपयोगिसंशयजनकत्वाद्विप्रतिपत्तेः विचा
रोपयोगित्वम् इत्युक्तमिति ज्ञानप्रामाण्यमिति पक्षनिर्देशः अत्र तद्वति तत्प्रकारकज्ञानत्वरूपमेव प्रामाण्यं पक्षः
ननु प्रमितिकरणत्वरूपमिति तात्पर्यं ग्राहकेति ज्ञानपदं तद्वत्तद्वति तत्प्रकारकज्ञानस्वरूपघटकतया पटत्वादि
रूपार्थभेदेन भिन्नत्वात् कस्यापि प्रामाण्यस्य यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वेन संभवत्यतः यद्धर्मघटितं प्रामाण्यं
यदाय यद्धर्मवत् दानतद्धर्मप्रकारकज्ञानग्राहकयावद्ग्राह्यत्वमेव साधनीयमनुमानप्रामाण्यं ज्ञानग्राहकयावद्ग्राह्यत्वमिति
तात्पर्यं ग्राहकेति ज्ञानपदं तत्प्रामाण्ये स्यादिति तद् प्रामाण्यग्राहिकायावती ज्ञानग्राहिकासामग्री तज्जन्यग्रहवि
षयत्वेनैवेत्यर्थः ।। एतादृशो ग्रहः गुरुमते व्यवसायः मुरारिमिश्रमते अनुव्यवसायः भट्टमते च ज्ञाततालिंगकानु

मिति॥ अत्र गुरुमते सर्वस्मिन्नेव ज्ञाने मितिमातृमेयेन त्रयं भासते तेन समवेतं घटत्वेन घटमहं जानामीत्याकारकं स्यैव व्य
वसायस्यानुव्यवसायत्वे॥ एवं व्यवसायस्य स्वप्रकाशत्वमकृत्वयाप्येवं स्वगतप्रामाण्यस्यापहरणात् एवं निप्रामाण्यस्य स्वतो
ग्राह्यत्वं। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणतानापातेन गौरवात् अनुपस्थितस्यापि प्रामाण्यस्य भानसंभवात्
मिश्रमते अयं घट इत्याकारकज्ञानानंतरं घटत्वेन घटमहं जानामीति ज्ञानविषयकलौकिकमानसप्रत्यक्षेण तेनै
न प्रामाण्यस्य ग्रहणात्। भट्टमते च ज्ञानस्यातींद्रियत्वेन ज्ञाततालिंगकानुमितेरेव माध्यमिकज्ञानस्य ग्रहणेन प्रामाण्यस्य
याप्रामाण्यग्र। एतेनानुमानप्रयोगः स्वघटाघटत्ववद्विशेष्यकघटत्वप्रकारकज्ञानविषयः घटत्वप्रकारकज्ञा
नत्वात् यत्रैवं तत्रैवं यथा मितिज्ञानं नानुव्यवसायविषयको ज्ञानजन्यः अतिरिक्तपदार्थ इति मतविवेकः। यावत्वविशेष
णे समवेतामाहकांतसार्थकमित्यभिप्रेत्याप्रथमतत्स्येव प्रयोजनं दर्शयति। अनुमानेनेति। प्रामाण्यस्येत्यादि

।सिद्धसाधनेनेति नैयायिकमतेपि इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वादित्यनुमानेन इदं ज्ञानं प्रमेत्याभ्यासेन त्वयैव गृह
त्वादिति भावः नैयायिकैर्निर्णयसाधकेबाधकप्रमाणापेक्षापि बोध्या पार्वादितोति। ननु सामग्र्या प्रामाण्यविशेषम
प्युक्तं पाव सामग्रीजन्यग्रहापादितसिद्धेः नहि सर्वाभिर्ज्ञानसामग्रीभिरेकज्ञानं जन्यते नवयानती सामग्रीः विशि
ष्टापादायाप्रादायनक्तज्ञप्तिग्रहविषयत्वसाध्यत्वमिति वाच्यं अनुभवसाधारणसामग्रीयज्ञानग्राहकत्वेन प्रवेशे
मतत्रयसाधारणापत्तिर्वा हादिति चेत्तत्रपतनः यावदिति प्रपतने ग्रहविशेषणं तथाच ज्ञानग्राहकसामग्रीजे
न्यया वद्ग्रहविषयत्वमिति फलितं ननु तद्धर्मप्रकारकज्ञानग्राहकसामग्रीजन्यग्रहत्वव्यापकविषयितानिरूपितविषयिताया
गित्वमिति तु निष्कर्षः इति संक्षेपः ॥ प्रामाण्याग्रहादिति ॥ मतत्रयसाधारणनिवेदस्यादिः अप्रामाण्याविषयीकरणा
दित्यर्थः । अप्रामाण्याग्राहकेनेति । तथाच तदृशज्ञानसामग्र्याः सद्भिकोद्यप्रविष्टत्वात्तयाप्रामाण्य

स्याग्रहणेपि न बाध इति भावः। अनुव्यवसायनिष्ठेत्यादि। तादृशानुव्यवसायनिष्ठं अप्रामाण्यग्राहिविशेष्यकत्वविशिष्ट
प्रामाण्यप्रकारकत्वरूपं प्रामाण्यं तन्मग्राहकस्येत्यर्थः। सामान्येन नपुंसकनिर्देशः स्वतस्त्वं न स्यादिति। पदानिरुक्तप्रामा
ण्यस्य पक्षत्वात् तदप्रामाण्याग्राहकाप्रामाण्यप्रकारकज्ञानग्रहजनकसामग्र्या एव साध्यकोटौ निवेशनीयत्वापा
तादृशसामग्र्या अप्रसिद्धत्वात्तस्य स्वतोग्राह्यत्वं न सिध्येदित्यर्थः। सप्तमीतत्पुरुषमभिप्रेत्याह तस्मिन्निति। एतस्यै
व विवरणं ग्राह्यप्रामाण्याश्रय इति। यादृशप्रामाण्यप्रकारकत्वानुमितावुद्देश्यतादृशप्रामाण्याश्रयविशेष्यकाप्रा
माण्यप्रकारकज्ञानाजनकेत्यग्राहकांशार्थः। इदं ज्ञानमप्रमेत्यनुव्यवसायनिष्ठाप्रामाण्यग्राहकसामग्र्याप्युक्तसाध्या
विशेष्यकाप्रामाण्यग्रहजनकत्वेपि अनुव्यवसायविशेष्यकाप्रामाण्यग्रहाजनकत्वात् तज्ज्ञानग्राहकत्वान्न अप्रामा
ण्यवद्विशेष्यकत्वादिघटितप्रामाण्यस्य स्वतोग्राह्यत्वसिद्धिरित्याह इदं हि तस्य चेति। इदं ज्ञानमप्रमेत्यत्रेत्यर्थः। अ ५८

धिकमस्मदीयाभिनवमणिदीधितिव्याख्यायामनुसंधेयं ॥ इत्थं विप्रतिपत्तिं प्रदर्श्य मीमांसकमतमुपन्यस्यति नन्विति स्वत
रा वेत्यादि। घटत्वादिविशिष्टज्ञानमात्रस्यापि निरुक्तसामग्रीतरावगम्यत्वमित्यर्थः। अप्यर्थके नैव कारणानुमानादिपरिग्रहः। अनु
व्यवसायेनेति। इदं च मिश्रमताभिप्रायेण। मतान्तरे व्यवसायघटकोपनीतप्राथमिकज्ञानग्रहेणेति ध्येयं। तत्संबंधस्यापीति घ
टघटत्वयोः संबंधस्यापीत्यर्थः। नन्वनुव्यवसाये कथं संबंधस्य भानमित्याशंक्य यथा घटघटत्वयोर्व्यवसायरूपप्रत्य
भानं तथा तत्संबंधस्यापि व्यवसायरूपप्रत्यासत्तेरविशेषादित्याह व्यवसायेति। ननु तावता नानुव्यवसाये प्रामाण्यस्य भानम
त आह पुरोवर्त्तिनि प्रकारसंबंधस्यैवेति। पुरोवर्त्तिनि यः प्रकारसंबंधस्तद्वृत्तित्वस्यैवेत्यर्थः। अयमाशयः नैयायिका
अपि अनुव्यवसायेऽविशेष्यप्रकारत्वयोर्भानमंगीकुर्वन्ति पुरोवर्त्तिनं घटत्वेन जानामीत्याकारकस्यैवानुव्यवसा
यस्य तैरंगीकारात्तत्परं तु पुरोवर्त्तिनि घटादौ घटत्वादिरूपप्रकारसंबंधभानमंगीकुर्वन्ति अतः तत्प्रकारसंबंधभानस्य

दीपि॰ प्र
५२

व्यवस्थापने किमपि नावशिष्टमिति प्रामाण्यस्य मानसिध्यति अनुपस्थितयोरपि विशेष्यप्रकारत्वयोर्भानस्य सर्वसं
मतत्वादिति । जलज्ञानमित्यादि । जलज्ञानं प्रमा न वेत्याकारकः । अनभ्यासदशायामाद्यमिकजलज्ञानग्रहोत्तरदशा
यामनुभवसिद्धः प्रमात्वसंशयो न स्यादित्यर्थः । निश्चितत्वादिति तदुत्तरनिश्चयस्य तदभाववत्ताज्ञानं प्रतिप्रतिबंधकत्वा
दिभावः । अत्र ज्ञातो घटः इति प्रतीतेर्ज्ञानविषयत्वाविषयकत्वकल्पनेनैव निर्वाहे ज्ञातिरिक्तज्ञातताकल्पनागौरवा
त् मानाभावाच्चेति तन्निरसनप्रकारो बोध्यः । तस्मादिति । अनभ्यासदशायां संशयानुभवादित्यर्थः । एतस्य स्वतोग्राह्यत्वा
भावे । अन्वयः । परतो ग्राह्यत्वमिति । प्रामाण्यस्यानुमानादिना ग्राह्यत्वमित्यर्थः । प्रवृत्तेरसत्त्वापत्तिरिति । एतेन मीमांसकैर
भ्युपगतानां प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुत्वाद्यभिचारो दर्शितः । न च निष्कंपप्रवृत्तावेव प्रामाण्यनिश्चयस्य हेतु
तासकंपप्रवृत्तौ तु प्रामाण्यसंशयस्य निष्कंपत्वसकंपत्वं चाविषयिताविशेष इः एवं च तत्र सकंपप्रवृत्त्यापत्तिकारे विप्रा ५२

माण्यनिश्चयस्य हेतुनापाकयंव्यभिचार इति वाच्यं तथापि पत्र प्रामाण्यस्याप्रामाण्यस्य वा ज्ञानेनासिद्धेः केवलजलादिज्ञा
नेतत्र प्रवृत्तिप्रदर्शनेन प्रामाण्यसंशयहेतुना यावद्व्यभिचारस्य दुर्वारत्वात् न चैवं जलादिज्ञाने प्रामाण्यनिश्चयकालेऽप्रवृ
त्तिः स्यादिति शंकनीयं। अगृहीताप्रामाण्यकजलादिज्ञानत्वेन हेतुना स्वीकारेण दोषाभावादिति संक्षेपः। जललाभेऽस
तीति। एतावता वक्ष्यमाणस्य प्रामाण्यव्यवस्थापकहेतोः स्वरूपासिद्धिशंका निरस्ता तदानीं पक्षस्यासत्वादप्र
पूर्वां स्यत्रभिति। समर्थेति। तद्वृद्धिशेषकृतत्वप्रकारकेत्यर्थः। अन्यथा उदाहरणासंभवादिति भावः। उदाहरणासद्दृष्टान्नमा
ह पदैवंतत्रैवमिति। पदस्य मानतः समर्थप्रवृत्तिजनकमित्यर्थः। व्यतिरेकिसाध्यव्यतिरेकव्याप्तिमत्ता। निश्चीयते।
अनुमीयते हि। नीयादिज्ञानेषु। द्वितीयादिजलज्ञानेषु। तत्सजातीयत्वलिंगेन। पूर्वज्ञानसजातीयत्वरूपलिं
गेन। समर्थप्रवृत्तिजनकत्वेनेति यावत्। एवं तद्वि प्रामाण्यमनुमीयतइत्यर्थः। एवं च प्रामाण्यतत्त्वं व्यवस्थाप्यान्य

नौतत्त्रिरूपपत्तिप्रमायाइति। प्रमासाधारणकारणमिति प्रमात्वावच्छिन्नदेशत्वनिधर्मानवच्छिन्नप्रमानिष्ठकार्यतानिरूपित
कारणताशालीत्यर्थः। तेनतानमात्रहेतुभूतात्ममनःसंयोगादेः अप्रमाजनकपित्तादिदोषवारणाय कृतम्। अप्रमासाधा
रणकारणत्वमप्येवमेवपरिष्कर्तव्यं। चतुर्विधप्रमाणं हेतुभूतं गुणं क्रमेणाघपादर्शयति तत्रेति। प्रमासुमध्य इत्यर्थः।
दूरत्वापहूनीयमिति। पीत। शंखदूरत्वादि, भ्रमेपित्तादिदोषः। इदंरजतमित्यादिभ्रमेचाकचक्यादिरित्यूहनीयमित्य
र्थः। अप्रमात्वस्यपरतस्त्वंसुपपत्तिकंदर्शयति पुरोवर्तिनीति। अनुपस्थितत्वादिति। आविषयीकरणादित्यर्थः। त
थाचअप्रमास्थलेतदभावादप्रमात्वस्यानुव्यवसायेनग्रहणंनसंभवतीतिभावः। अप्रमात्वं। तदभाववद्विशेष्यकत्ववि
शिष्टतत्प्रकारकत्वं। परतएवेति। ज्ञायतइति। अनुमानादिनाएवेति। ज्ञायतइत्यर्थः। अनुमानप्रयोगस्तु इदंज्ञानमप्र
माविसंवादिप्रवृत्तिजनकत्वात् यन्नैवंतन्नैवंयथाप्रमेति। गुरुमतंनिरस्यान्यथाख्यातिंव्यवस्थापयितुमन्विसा ५०

दिना। यथार्थत्वात् प्रमात्वात् अयथार्थज्ञानमेव नास्तीति। तदभाववद्विशेष्यकतत्प्रकारकत्वरूपायथार्थत्वं ज्ञानवृत्तिने
त्यर्थः। तेन नोसख्यातिसिद्धिः। बाधात् ॥ अयथार्थत्वस्य तु प्रसिद्धिरित्याद्यौ दोषो वोध्यः। अन्यथाख्यातीति। तदंशे शीकारे पुरोव
र्त्तिविशेष्यकरजतत्वादिरूपेण तादृक्छेदकप्रकारकज्ञानस्य संवादिविसंवादिसाधारणप्रवृत्तिजनकतया तत्र प्रवृत्ति
रुक्तस्यादिति भावः। रजतमस्तीति। इदमनिपतत्पूर्ववर्त्तिभ्यामित्यादिः। संभवादित्ति। तथा च प्रवृत्तिप्रति विशिष्ट
ज्ञानत्वेन कारणत्वे नैव नास्तीति तन्न दुरुद्धरत्वेनान्यथाख्यातिकल्पनं न संभवतीति भावः। नन्वेवं पक्षेनेदं रजतमिति वा
ध्यग्रहतत्राभिप्रवृत्तिः स्यादत आह उपस्थितेति। एतावता समारोपितप्रकारणार्थे सा स्फुटी कृता। पृथुभेदाग्रहस्यैव। इ
ताद्दिरूपे भेदाग्रहाभावस्यैव। एवकारेण विशिष्टज्ञानस्य प्रवर्त्तकत्वव्यवच्छेदः। सर्वत्रेति। रजते रङ्गे चेत्यर्थः। रजतत्व
लविशिष्टज्ञानस्यैव प्रवृत्तिप्रतिकारणत्वमेव व्यं अन्यथा धर्मधर्मिज्ञानयोरिव भेदाग्रहत्वरूपगुरुधर्मविच्छिन्नस्य

दि॰प्र॰ च कारणतापत्तेः एवं च तत्र प्रवृत्तिं प्रत्यन्वयव्यतिरेकाभ्यां विशिष्टज्ञानस्य कारणतायां कल्पनीयायां लाघवात्सामान्यतः प्रवृत्तित्वावच्छि-
न्नं प्रति विशिष्टज्ञानत्वेनानुगतकारणभावस्यैव कल्पनीयतया विसंवादिप्रवृत्तेरपि न कार्यतावच्छेदकावलीढतयानपूर्वविशिष्ट-
५२ ज्ञानस्य कल्पनीयत्वादन्यथाख्यातिर्निराबाधैवेति समाधत्ते समस्य रजतेति। रजतत्वप्रकारकज्ञानस्येति यादृशज्ञानत्वावच्छिन्नस्य
त्यर्थः। प्रवृत्तिजनकतया प्रवृत्तित्वावच्छिन्नजनकतया। विशिष्टज्ञानस्यैव। पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञान
स्यैव। एवं चेनेष्टभेदाग्रहस्य चावच्छेदकल्पनात् अनुमानान्तरप्रयोगमाह पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञा
नं जन्यप्रवृत्तित्वावच्छिन्नजनकतावच्छेदकीयप्रवृत्तिवादिनि। स्यादेतत् अंशे संनिकर्षस्य कारणतया रजतत्वांशे तदभावेन कथं रजता-
विदं रजतमिति प्रत्यक्षमिति चेत् अत्रैवं अलौकिकसन्निकर्षस्यापि प्रत्यासत्तिजनकतया व्याख्यापितत्वेन ज्ञानलक्षणाप्रत्यासत्तेरेव प्र-
कृते संभवात्। ननु अयथार्थानुभवस्य त्रैविध्यकथनं मूले। संगतं स्वप्नज्ञानस्यानुभवत्वपदार्थप्रमाणकपञ्चिकादिरूपत्वानु ५२

दीपि.प्र
५२

सरणान्नसमूहालंबनेऽतिप्रसंगः संशयस्य व्यावारणाय संशयान्यज्ञानायेकनिश्चयपदमिति संक्षेपः। मूलेव्याप्यारो
पेणेति। आहार्यव्याप्यवत्ताभ्रमजन्यः आहार्यव्यापकवत्ताभ्रमस्तर्क इत्यर्थः आहार्यपतज्ज्ञानमात्रेऽप्रसंगवारणाय वन्
न्यात्तमनायंपुरुष इति निश्चयसत्वेऽपि स्वादौ करादिमत्वमादायं पुरुष इत्याहार्यारोपस्तत्रातिव्याप्तिवारणाय प्रथममा
हार्यपदं। रजतत्वव्याप्याभाववत्ताग्रहकालेऽप्याहार्यं पङ्कजनत्वव्याप्यवत्ताज्ञानं तज्जन्येदंरजतमित्यनाहार्यज्ञाने
तिव्याप्तिवारणाय द्वितीयमाहार्यपदं। तर्कश्चापाद्यव्यतिरेकनिश्चयः आपाद्यापादकयोर्व्याप्तिनिश्चयश्च कारणमि
ति ध्येयं। तर्कस्तु मानसविपर्ययरूप एवेति कथमयथार्थस्यैव विध्यकथनमित्याह यद्यपीति। प्रमाणानुग्राहकत्वं। प्र
माणेन प्रमायां जननीयायां प्रतिबंधकविघटनद्वारा योग्यत्वं। भेदेनेति। तर्कत्वरूपवैलक्षण्येनेत्यर्थः। तर्कस्य प्रमा
णानुग्राहकत्वज्ञापनाय तथा कथनमिति भावः। ननु सर्वेषामनुकूलतया वेदनीयमित्यादि मूलं सुखादिलक्षणा ५२

दि·धि·प्र·
५२

चकारणतापत्तेः एवं च न प्रवृत्तिं प्रत्यन्वयव्यतिरेकाभ्यां विशिष्टज्ञानस्य कारणतायां कल्पनीयायां लाघवात्सामान्यतः प्रवृत्तित्वावच्छि
न्नं प्रति विशिष्टज्ञानत्वेनानुगतकारणाभावस्यैव कल्पनीयतया विसंवादिप्रवृत्तेरपि न कार्यतावच्छेदकावलीढत्वं यथा न पूर्वविशिष्ट
ज्ञानस्य कल्पनीयत्वात् व्याख्यातिर्निराबाधैवेति समाधत्ते सम्यगिति। तत्र तत्प्रकारकज्ञानस्येति तादृशज्ञानत्वावच्छिन्नस्य
प्रवृत्तेः प्रवृत्तिजनकतया प्रवृत्तित्वावच्छिन्नजनकतया। विशिष्टज्ञानस्यैव। पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञान
स्यैव। एवमेतेन भेदाग्रहस्य प्रवृत्त्यवच्छेदककल्पनात् अनुमानान्तरप्रयोगस्तु इयं पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञा
नजन्याप्रवृत्तित्वात् तज्जन्यस्थलीयप्रवृत्तिवदिति। स्यादेतत् अंशे सन्निकर्षस्य कारणतया रजतत्वांशे तदभावेन कथं शक्ता
विदं रजतमिति भ्रमः स्यादिति चेन्नैवं अलौकिकसन्निकर्षस्यापि प्रत्यक्षजनकतया अवश्यापि न तेन ज्ञानलक्षणप्रत्यासत्तेरेव प्र
कृतेः संभवात्। ननु अयथार्थानुभवस्य त्रैविध्यकथनं मूले। संगतं स्वप्नज्ञानस्यानुभूतपदार्थस्मरणात्मकप्रत्वि(?)त्वादित्यधानु ५२

शुभाद्यैर्जायमानस्य बाधितार्थविषयकस्यानुभवसिद्धत्वात्तत्राहं सम स्येति । यद्यपि प्रदेशविशेषावच्छिन्नमनस्संयोगद
खभः तथापि तदसमवायिकारणकज्ञाने स्वपशब्दोप्रसक्तः सवषेयः । दासुखादिरूपत्वासंभवाद्दाहमानसेति । यत्नुस
तिरूपस्य मज्ञानमिति ति तर्काद्यादि विरुद्धमित्युपेक्षितं । कोटिद्वयावगाहिज्ञानोत्तरं जायमाने एकस्मिन्धर्मिणि घ
ट तद्भावोभयप्रकारकसमुच्चये तिव्याप्तिवारणाय विरोधविषयकत्वस्य निवेशेपि ज्ञानेस्यावश्यकत्वेति दर्शयितुमा
ह परस्परविरुद्धेति । ज्ञानेनेति । एकधर्मिनिष्ठविशेष्यतानिरूपितविरुद्धनानाधर्मनिष्ठप्रकारताकत्वाभावान्नातिव्या
प्तिरिति भावः । नच विभिन्नरूपेणैकधर्मिविशेष्यकविरुद्धानेकधर्मप्रकारकज्ञाने तिव्याप्तिरिति वाच्यं । एकध
र्मावच्छिन्नविशेष्यताघटितपरिष्कारकरणेनादोषादिति दिक् ॥ तदन्तरे ब्रह्मभिन्नं सर्वं मिथ्येति च मिथ्यात्वश्रावस्य
प्रयोगस्य दर्शनादाह तदभाववतीति प्रमाया लक्षणमाह इदं । तद्भाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वाकेस्याघटितविव

दीपि॰प्र स्मरणान्नसमूहालंबनेऽतिप्रसंगः। संशयस्य व्यावृत्त्यर्थं वारणाय संशयान्यज्ञानार्थकं निश्चयपदमिति संक्षेपः। मूले व्याप्यारो
५२ पेणेति। आहार्यव्याप्यवत्ताभ्रमजन्यः आहार्यव्यापकवत्ताभ्रमस्तर्क इत्यर्थः। आहार्यत्वज्ञानमात्रेऽतिप्रसंगवारणाय जन्य
न्यान्तम्। नायं पुरुष इति निश्चयसत्वेऽपि स्थाणौ करादिमत्त्वमादायं पुरुष इत्याहार्यारोपस्तत्रातिव्याप्तिवारणाय प्रथममा
हार्यपदं। रजतत्वव्याप्याभाववत्ताग्रहकाले आहार्यं पङ्कजनत्वव्याप्यवत्ताज्ञानं तज्जन्यं पङ्कजनत्वमित्यनाहार्यज्ञाने
तिव्याप्तिवारणाय द्वितीयमाहार्यपदं। तर्के आपाद्यव्यतिरेकनिश्चयः आपाद्यापादकयोर्व्याप्तिनिश्चयश्च कारणमि
ति ध्येयं। तर्कस्त्वनुमानसविपर्ययरूप एवेति कथमयथार्थस्यैवैविध्यकथनमित्यत आह यद्यपीति। प्रमाणानुग्राहकत्वं प्र
माणेन प्रमायां जननीयायां प्रतिबंधकविघटनद्वारा योग्यत्वं। भेदेनेति। तर्कत्वरूपवैलक्षण्येनेत्यर्थः। तर्कस्य प्रमा
णानुग्राहकत्वज्ञापनाय तथाकथनमिति भावः। ननु सर्वेषामनुकूलतया वेदनीयमित्यादिमूलं सुखादिलक्षण ५२

परं न भवति परद्रव्योपभोगादिजन्यसुखे साधनतादोषदर्शनाद्व्याप्तेरित्याशंकायां सुख्यहमित्यादिप्रत्यक्षसिद्धसुखत्वा
दिकमेव लक्षणमित्याह सुख्यहमित्याद्यन्विति। सुखत्वादीत्यादिना दुःखत्वपरिग्रहः। यथाश्रुतं त्विति। सर्वेषामनुकूले
त्यादिकमित्यर्थः। अनुभवेतीति स्मृतिं संस्कारं च प्रत्यनुभवत्वेन कारणतावच्छेदकतां प्राचामयमभिप्रायः। तत्तद्विषयकस्मृ
तिं तादृशसंस्कारं च प्रति तत्तद्विषयकानुभवत्वेनैव हेतुता न तु तत्तद्विषयकज्ञानत्वेन अनुभवत्वस्यापि जातित्वेन ज्ञा
नत्वापेक्षया गौरवाभावात् न च विनिगमनाविरह इति शंक्यः व्याप्यधर्मस्य पुरस्कारेण कारणत्वसंभवे व्यापकधर्मस्या
न्यथासिद्धिनिरूपकत्वादिति। नवीनास्तु पुनः तत्तद्विषयकस्मृतिं तादृशसंस्कारं च प्रति तत्तद्विषयकज्ञानत्वेनैव हे
तुता न त्वनुभवत्वेन संस्कारस्य फलनाश्यतया प्रथमस्मरणेनैवानुभवजन्यसंस्कारस्य नाशेन सहस्रदत्तुभूतस्य स्मर
णांतरमस्मरणप्रसंगात् न च स्वजन्यस्मरणस्य संस्कारनाशकत्वे स्मृतिसाधारणेन ज्ञानत्वेन हेतुत्वेपि घटपटादिस्मृ

दीपि॰प्र॰ पनानाविषयावगाहिनाऽनुभवेनजनितस्यतावद्विषयकसंस्कारस्यघटादैकैकगोचरस्मरणेनापिविनाशात्तदुत्तरंपटादिस्मरणा
५३ नुपपत्तिः॰तद्विषयकसंस्काराभावात्।स्मृतिजन्यपटादिगोचरसंस्कारस्यचभिन्नविषयत्तयापटादिस्मारकत्वायोगादतःस्व
जन्यचरमस्मृतेरेवनाशकत्वात्तत्तद्व्यक्तित्वेनतत्तत्संस्कारनाशकतायाअंगीकर्तव्यतयाऽनुभवत्वेनजनकतायामपिनदोषइति
वाच्यं।अन्यूनविषयकस्यैवकल्लस्यनाशकत्वांगीकारेणादोषात्तथायत्वपुनःपुनस्मरणाद्दृढतरःसंस्कारः।दार्ढ्यंचोत्क
षरूपोजातिविशेषोभूरितिभूरनुभवादृष्टप्रयोजकः।नचदैववशसंपन्नास्मृतिमुद्बोधकसमवधानादेवभूरितिसरजितिप
मोपपत्तौनतस्यप्रयोजकत्वयासंस्कारगतोजातिविशेषःसिध्यतीतिवाच्यं।भूरितिस्मृतेर्दैवाधीनभूरित्सुद्बोधकसमव।
धानाधीनत्वमुपगम्यसंस्कारातिशयरवऽतेशास्त्राद्यावभ्यासस्यैवानापत्तेः।किंचपरीत्त्यन्यवनिश्चिताव्यभिचारकंरू
पंगृह्यमाणव्यभिचारकेणकारणत्वकल्पनंनसंभवतीतिनानुभवत्वेनस्मृतिसंस्कारहेतुतासंभवइतिप्राञ्चः।नव्यमतंतु ५३

र्थयतिस्मन्नेरयीति। अपिनाऽनुभवपरिस्त्रहः सत्तन्मोतेदलक्षणं। तुभकजन्मेनिस्यानेज्ञानजन्येतिनिवेदनीयं। द्रव्यविभाजको
पाधीति। पृथिवीत्वजलत्वादिरूपं यद्द्रव्यविभाजकोपाधिद्वयं प्रत्येकं तत्समानाधिकरणाः द्वित्वद्विपृथक्त्वसंयोगा
दयः तदवृत्तितात्तिमद्गुणत्वमित्यर्थः। रूपादिषु चतुर्षु नादृशं रूपत्वादिकं सांसिद्धिकद्रवत्वेच द्रवत्वत्वावांतरजातिस्नेहा
दिषु दशसु स्नेहत्वादिकं भावनापसंस्कारत्वावांतरजातिं वादाय लक्षणसमन्वयः। नन्विदं लक्षणमेकत्वादिष्वतिव्या
प्तं एकत्वत्वादिजातेरपितादृशत्वात् नच तादृशोपाधिद्वयसमानाधिकरणावृत्तिगुणत्वव्याप्यजातिशून्यगुणत्व
मित्तितदर्थः। एवंचैकत्वादिषु संख्यात्वादेः सत्वात्तादृशजातिशून्यत्वस्यासत्वेन नातिव्याप्तिरिति वाच्यं एवमपि परि
माणादिष्वतिव्याप्तेः परिमाणत्वादेस्तादृशजातित्वासंभवादिति चेदत्र ब्रवदंत्यभिज्ञाः। यद्द्रव्यावच्छिन्नसमानाधि
करणं यत्किंचिद्द्रव्यविभाजकोपाधिद्वयं तत्तद्भिन्नाप्यितिस्यापकवृत्तिभिन्नाच या जातिस्तद्वत्वे सति गुणत्वमिति तदर्थः।

दीपि·प्र यद्रूपावच्छिन्नसामानाधिकरण्यस्य समवायसंबंधघटितस्यैव निवेशनीयत्वाद्रूपपदेन घटत्वादेर्धर्तुमशक्यतया ह्रदादावतिव्याप्तिरतो

५८ विशेष्यं स्थितिस्थापकः इति व्याप्तिवारणाय स्थितिस्थापकवृत्तिभिन्नेति । स्थितिस्थापकस्य पृथिव्यादिचतुष्टयवृत्तित्वमतेनु

नदेपं । रूपत्वादेर्यद्रूपपदेन धर्तुमशक्यत्वेऽप्यवांतरजातीनादाय रूपादिवल्लक्षणसमन्वयः । पार्थिवानुष्णाशीतस्पर्शस्यापि वा

यवीयापेक्षया विजातीयस्यैवानुभवसिद्धत्वात् । संख्यादयस्तु सामान्यगुणा इति न तत्र वैजात्यं न पृथिव्यादिभेदेन सिद्धं न सिद्ध

मतस्तत्र नातिव्याप्तिः । तादृशजातिमद्भिन्नगुणत्वमेव सामान्यगुणानां लक्षणमत्र सेत्स्यतीति । प्रकृतोक्तस्पर्शसंग्राहकत्वाभा

वादाहत्य क्तेति । निसमिति । अत्र नित्यत्वं प्रागभावाप्रतियोगित्वं ध्वंसाप्रतियोगित्वं वा । एकेनरनिवेशेनापि संयोगादेर्वारणा

त् । एकपरं स्वरूपकथनमिति द्रष्टव्यम् । लेख्याक्वचित्का इति । नित्यद्रव्याणां परस्परभेदसाधकत्वमर्थः । अथ विशेषपदार्थे किं

प्रमाणं नचानंतानंतसंकीर्णानां परमाणूनां भेदकधर्मं विना भेदासिद्धिरतः विशेषोऽङ्गीकर्तव्य इति वाच्यं योग्यत्वादिधर्मैरेव भेद ५८

कत्वसंभवादिति चेन्न अयन्तः। एतत्परमाणौ तत्परमाणुभेदसाधने एकत्वादेर्व्यभिचारितत्वात् एतद्देकत्वादेरेव हेतुनावाच्यान
वत्तयोः परमाण्वोर्भेदासिद्धावेकत्वाद्यवेतत्वस्यप्रहं। एतत्परमाणुसमवेतत्वं हि तस्यैतत्वं तस्मात्त्रितिनित्यद्रव्यमेषु व्या
विशेषपदार्थः स एकश्चस्वसजातीयानां परस्परं भेदसाधकइतिनित्यापिविशेषांतरापेक्षा नास्ति अतो नानवस्थेतिसंप्र
दायः। वैशेषिकमतसाधारण्येन समवायेऽनुमानं प्रमाणयन्ति नीलइति। समवायिकारणत्वसंयोगाभावपविनिसत्ता द्रव्यति
न्यपरमाणुवारणायनन्येति। अस्मिन्नपदवस्यमेवायुतसिद्धसमवेतेषु तेविनष्टपदवस्यत्वनाश्रितत्वस्य गुणमवर्त्तिष्ठतेयथा तंत्वा
दिनाशोपष्ठादिति तिमनस्मि समले। विनष्टपदिस्वुतं। प्रागभावेमप्रमाणमाहमदिव्यनीति। संसर्गेति। तादात्म्यातिरिक्त
संसर्गान्यर्थः। ध्वंसप्रागभावयोरपि प्रतियोगितावच्छेदकसंबंधावच्छेदेनतरनिमत्ताभिप्रायेण त्रैकालिकेतिविशेषणम्
न्यथा। अन्योन्याभाववारकेरौवतयोवारणानुत्तल्यर्थतापत्तेः पदिसंसर्गावच्छिन्नप्रतियोग्यभावेदन्योन्याभावभिन्नोऽभावइत्यर्थः।

दीपि प्र॰ तस्य त्रैकालिकेति सिद्धान्तेपि सार्थकं । त्रैकालिकत्वमिह नित्यत्वरूपं । भूतले भूतले घटो नास्तीत्यत्र घटाभावांशे भूतलस्य वि
शेष्यत्वसंबंधः घटाभाववद्भूतलमित्यत्र तु भूतलांशे अभावस्य विशेषणत्वसंसर्ग इति वदतां प्राचामयमभिप्रायः विशेष्य
५५ त्वविशेषणत्वे स्वरूपसंबंधविशेषौ न ज्ञानीयविषयतानिविशेषो न वा विशेषणतात्वमपि स्वरूपसंबंध एक एवास्तु भूतले घ
टो नास्तीति प्रतीतौ भूतलं घटाभाववदिति प्रतीतौ च तौ वैलक्षण्यस्य विशेषणतावच्छिन्नाधेयताविषयत्वेनैव नि
र्वाहादिति वाच्यं तादृशप्रतीत्योर्वैलक्षण्याय प्रथमायां विशेषणतानवच्छिन्नाधेयता द्वितीयायां विशेषणतासंसर्गस्तु
ये ते किं वा प्रथमायां विशेषणतानां द्वितीयायां विशेषणतानवच्छिन्न आधारतेत्यत्र विनिगमकस्य दुर्लभत्वात् न च तादृशप्रती
त्योः संसर्गांशे वैलक्षण्येपि विशेष्यविशेषणभावभेदाद्वैलक्षण्योपपत्तिरस्तु उभयत्र विशेषणतायाः एव संबंधतास्त्वि
ति वाच्यं नावतापि भूतले घटो नास्ति भूतलवान् घटाभाव इत्यनयोः भूतलं घटाभावः तथ घटाभाववद्भूतलमित्यनयोश्च प्रती ५५

स्मोर्वैलक्षण्यानिर्वाहात्तस्माद्विशेष्यत्वविशेषणत्वनामकयोरुभयोः स्वरूपसंबंधविशेषयोः संसर्गतानवच्छेदकं नल
वानुघटाभाव इत्यत्र घटाभावांशे भूतलस्य विशेषणत्वसंसर्गो घटाभाववद्भूतलमित्यत्र च भूतलांशेऽभावस्य विशेष्यता
संसर्गाभासस्तेस च तत्र बाधित इति भ्रमत्वनिर्वाह इति संक्षेपः ॥ ध्वंसप्रागभावयोरेकप्रतियोगिकयोरत्यन्ताभावान्योन्याभा
वयोः किमेकविधत्वं नेत्याह प्रतियोगिनेति ॥ आरोपेति प्राचीनमताभिप्रायेण ॥ अत्र यथायोग्यं प्रतियोगितावच्छेदकध
र्मसंसर्गभेदः अत्यन्ताभावबहुत्वप्रयोजकः प्रतियोगितावच्छेदकधर्मभेदोऽन्योन्याभावबहुत्वप्रयोजक इति द्रष्टव्यं ॥ तदे
व दर्शयति केवलेति ॥ केवलेत्यत्यन्ताभावादिविशिष्टाभावस्यातिरिक्तत्वमन्वयः ॥ अन्यथा केवलं दण्डवति दण्डी नास्तीति प्रत्य
यानापत्तेः ॥ अन्योन्याभावस्यातिरिक्तत्वे प्रतीतिं प्रमाणयति एकसत्वेपीति ॥ घटपटौ न स्त इत्यादौ घटत्वपटत्वमुभयत्वं वैतत्त्रि
तयं प्रतियोगितावच्छेदकं ॥ केवलघटत्वेति केवलपटत्वेति पाठे चिदुभयवत्तिश्च तथा प्रत्ययात् ॥ संबंधभेदेनाभावस्यातिरि

दी·वि·प्र·
५६

क्तत्वं दर्शयति संयोगेनेति । सामान्यविशेषाभावयोर्भेदं दर्शयति तत्तदिति । अतिरिक्त इति । अन्यथा यत्किंचिद्घटवति घटो ना
स्तीति प्रत्ययापत्तेः ॥ एवमन्योन्याभावेऽपीति । अवच्छेदकभेदान्न तत्तद्घटभेदत्वउभयभेदः घटभेदस्यातिरिक्तत्वे सर्वथा प्रसंगा
दाहघटत्वेति । नांगीक्रियत इति । अभावीयविशिष्टवैशिष्ट्यावगाहिमर्यादोपदर्शितत्वं तथा घटत्वेन पटो नास्तीत्यादिप्र
त्ययस्य विशिष्टवैशिष्ट्यानवगाहिनो घटत्वादेः प्रतियोगितावच्छेदकत्वं स्वव्यापकत्वाभावेन व्यधिकरणधर्मावच्छिन्ना
भावे मानाभावादिति भावः ॥ ननु तर्हि तादृशमत्ययस्य का गतिरित्यत आह पट इति । ननु घटत्वेन पटो नास्तीति प्रतीतेः प
टाधिकरणाकघटत्वाभावावगाहित्वं न संभवति अप्रसक्तिबाधकेन तच्छेदाश्रेखिप्रतीतेः तत्तच्छब्दप्रतिपाद्यार्थविषयकत्व
परित्यागायोगात् पटाधिकरणाकस्य घटत्वाभावस्य घटत्वेन पटो नास्तीति शब्दात्कथमप्यप्रतीतेः किंतु अवच्छिन्नप्रतियोगि
ताकत्वसंबंधेनाभावांशे स्वातन्त्र्येण घटत्वावगाहित्वमेव अभावबुद्धिर्विशिष्टवैशिष्ट्यावगाहिमर्यादां नातिशेत इति निय ५६

मस्तु न एकं च व्यधिकरणधर्मावच्छिन्नाभावः सप्रमाणः इति चेदस्तु तर्हि नितिरिक्तत्वं तस्येत्याह अतिरिक्तत्व इति। सः व्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकः। केवलान्वयीति। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिरूपविरोधिविरहादिति भावः। नन्व
भूतलादौ घटसत्त्वदशायां न तदभावबुद्धिरपरानुजायते। तस्मामपि काभावो। तिरिक्त एवाङ्गीकर्तव्य इति वदन्तं निराहसा
मयिकेति। प्रतियोगिविरहसमये प्रतीयमानो। संतताभाव एव सामयिकाभावः ननु सप्तविनाशशाली अतिरिक्त इति समु
दितार्थः। नन्वेवं भूतले घटस्यानयनदशायामपि तदभावस्य नित्यत्वेन सत्तापत्त्या यावत्तिरत्याह घटाभाववतीति। निया
मकत्वमेव समुपपादयति घटवतीति। तत्तत्कालावच्छिन्नभूतलादेरेव घटाद्यभावसंसर्गत्तया घटकालेच तत्कालविशिष्टभू
तलादिरूपसंसर्गाभावेन तदानतद्संतताभावबुद्धिरित्यपि द्रष्टव्यं। अन्योन्याभावो मात्वतिरिक्तः पदार्थः। यस्मिन्नधिकरणे घ
टो नास्तीत्यादिप्रत्ययस्तस्मिन्नधिकरणे घटाद्यभाववत्त्वकल्पनेनैव तथा प्रतीतिनिर्वाहात् तद्धर्मतावधर्मकल्पनायाअ

क्तमर्धर्मिकल्पनातो लघीयस्त्वादिति गुरुमतमाशंक्य नेकेवलेति । यद्यप्यनंतेष्वधिकरणेषु धर्मकल्पनतोऽतिरिक्तैकधर्मि
कल्पनस्यैव लघीयस्त्वाद्वक्तुं न्यायस्यानवतारः किंत्वभावस्याधिकरणस्वरूपत्वे जलादौ विद्यमानस्यापि गंधाद्यभावस्य जला
दिरूपत्वादितरेंद्रियग्राह्यतापत्तिरित्यादिदूषणानि प्रस्फुरंतीति न यापि केवलाधिकरणादेवेति तद्व्यवहारनिरासादेव तन्निहन्निसं
भवेदिति मतान्तरेऽपेक्षितानीत्याशंक्य तत्रेदं निराकरोति अभावानंगीकार इति । अतिरिक्ताभावानंगीकार इत्यर्थः । अथ किमिदं
कैवल्यं भूतलस्वरूपमिति चेत् घटवद्भूतलस्यापि घटाभावस्वरूपत्वापत्त्या तदानीमपि घटाभाववत्ताबुद्धिप्रसंगः घटाभाव
दवत्त्वमिति चेत् सिद्धमतिरिक्ताभावेनातः कैवल्यनिर्वचनमशक्यमिमाह कैवल्यस्येति नन्वभावस्यातिरिक्तत्वे तदभावोऽप्य
तिरिक्तस्याप्यभावत्वे पेऽनवस्था स्यादत आह अभावाभाव इति । ध्वंसे स्यादि ध्वंसप्रागभावः प्रतियोगिस्वरूपः तथा
गभावरूपश्च । प्रागभावध्वंसस्तु प्रतियोगिरूपत्वध्वंसस्वरूपश्चेत्यर्थोऽवसेयः । तेन प्रतियोगिप्रागभावदशायामपि ध्वंसो ५८

भविष्यतीति प्रत्ययस्य प्रतियोगिध्वंसदशायामपि प्रागभावो न घटत्वस्य स्वोपपत्तिः ननु कालेद्रव्यत्वं नास्तीति प्रत्ययो न ज्ञापत्ते
द्रव्यत्वाभाव इति नुज्ञापत्त इति वैषम्यं निर्वाहाय नास्तीति प्रत्यये दैशिकविशेषणतासंबंधावच्छिन्नाधेयत्वाभावं परिकल्पनीयमि
त्यत्र घटाभावाभावादेः घटादिरूपत्वे त्विह घटाभावो नास्तीति प्रत्ययस्य भ्रमत्वमेव स्यात् भावस्य विशेषणतानाविशेषणसंबंधेन
गीकारात् तः अभावाभावोऽतिरिक्तो न तु भावरूप इति नवीनमतं दर्शयितुमभावेति । नहि नवस्यैव मतस्याप्यारा ततीयेति प
रमकारुणिकेन मुनिना दुःखपंकमग्नं जगदुद्दिधीर्षुणा प्रणीतं प्रमाणप्रमेयेत्यादिसूत्रमतद्विरोधं परिहरतुमाशंकते नन्वि
तिप्रत्यक्षप्रमाणस्य द्रव्येऽनुमानादीनां चतुर्णामन्तर्भावस्य स्फुटत्वात् प्रमेयादीनां द्रव्यादिष्वंतर्भावमाह आत्मेत्यादिना । आ
त्मशरीरेंद्रियाणां द्रव्ये । अर्थस्य पृथिव्यादिरूपस्य द्रव्यादिषु बुद्धेर्गुणे अंतरिंद्रियस्य मनसो द्रव्येऽन्तर्भावः । एवमग्रे
पि यथायथमंतर्भावो द्रष्टव्यः । धर्माधर्माविति । तज्जनिके सर्वः । एतेन स्मृत्याकारे । एगन्द्धा । इच्छाविशेषः । मरणमिति ।

५८ मरणानंतरभाविजननमितिमर्थः तथा च यद्यपीति। जन्मत्वाभावेऽत्र न निमित्तिः। चरमः प्राणशरीरसंयोगध्वंसो मरणं।
आद्यः शरीरप्राणसंयोगो जननं। मुक्तात्मन्यसंयोगध्वंसवत्त्वोपटस्य मुक्तत्वापत्तिवारणाय दुःखध्वंसहत्तिदुःखध्वंस
वीनामस्मदादीनामपि मुक्तत्वापत्तिवारणाय कालीनांतं। अन्यदीयदुःखप्रागभावसमानकालिकदुःखध्वंसवत्ताशंका
यामस्मदादीनाममुक्तत्वप्रसंगात्स्वसमानाधिकरणेति दुःखप्रागभावविशेषणं। न च समानाधिकरणदुःखासमानकाली
नेनैव सुषुप्तकालिकदुःखध्वंसस्याप्यग्निमदुःखस्मरणानुहेतेर्वारणात्प्रागभावेतिव्यर्थमिति वाच्यं यथासन्निवेशे वैयर्थ्या
भावादिति दिक्। संशयस्य निरूपितत्वात्प्रयोजनस्वरूपं दर्शयति प्रयोजनमिति। उभयसाधनवती। गुरुपक्षनिराक
रणात्स्वपक्षसाधनवतीदं च वितंडानिर्व्याप्तिवारणायेति शेषे। स्वपक्षेति। अत्र विजिगीषुकथेत्यनुवर्त्तते। नानेति। ए
केन पूर्वपक्षः। अपरेण। ये न च समाधानमेव क्रमेणानानाकर्तृकत्वं वाक्यसमूहस्यावसेयं फलमिति। यथा नवके ५८

वलोमेदस्तस्त्वरितिनूननतात्पर्येणाप्रयुक्तस्यनवत्तसंख्याविशिष्टप्रर्थानंतरमीदिकल्पकश्चिद्रूपपतिनास्यकंवलाः संपति
दरीडुलादिमादि। अप्रस्तुतोपमिति। उत्तरस्यासतत्वनस्यबाधातकत्वंनद्वंतारभेदानुदर्शयतिसाधर्म्यमादिना। दंडवंतेश्च
पमाणस्यसमेसस्यप्रत्येकंयोगः। साधर्म्यसमावेधर्मसमेमाद्यः चतुर्विंशतिर्ज्ञातयः साधर्म्येणाख्यापनाद्धेतुरूप
कमुत्तरसाधर्म्यसमा। यथा आत्मासक्रियः क्रियाहेतुगुणवत्वात्लोष्ठवत्क्रियाहेतुगुणाश्चात्र क्रियाजनकवायुसंयो
गादिरेवेतिस्थापनायामुत्तरं यदिसक्रियसाधर्म्यादात्मा क्रियः तदाविभुत्वस्याविशिष्टयसाधर्म्यान्निष्क्रियपरमाणुवदिनस्या
ततवाभ्यां कश्चिद्विनिगमकमस्तीति १ वैधर्म्येणात्तद्रूपकमुत्तरंवैधर्म्यसमा। यथा। तत्रैवक्रियावत्तोलोष्ठस्यसा
धर्म्याद्यदिक्रियावानात्मातदाविभुत्वरूपतद्वैधर्म्यान्निष्क्रियपरमाणुवत्किंनस्यान्ननिहितस्माभंर्मस्यपक्षेष्यापादनम
त्कर्षसमा। यथा शब्दोऽनित्यः कृतकत्वाद्घटवदित्यादौ कश्चिद्देवमाहयदिकृतकत्वेनहेतुनाशब्दोघटवदनित्यःस्या

दिपी॰प्र मर्हि तर्हि नैव हेतुना शब्दो घटवत्सावयवः स्यादिति ॥३॥ परोक्तदृष्टान्तसाधर्म्येणापक्षे पराभिमतधर्मान्तरस्याभावसाधनामपक
र्षसमा । यथा तस्मिन्नेवानुमाने यदि कृतकत्वेन शब्दो घटवद् नित्यः स्यात्तर्हि तेनैव शब्दो घटवदश्रावणः स्यादिति ॥४॥ वर्ण्य
५९ स्पस्थापनीयस्य दृष्टान्तधर्मस्य पक्षे साधनं वर्ण्यसमा । यथा पूर्वोक्तानुमाने क्रियाजनकनोदनाख्यसंयोगवत्त्वाल्लोष्टा
देः भवतु क्रियावत्त्वं आत्मनस्तु क्रियावत्त्वे तज्जनकनोदनाख्यसंयोगवत्त्वमपि स्यादिति ॥५॥ साध्यहेत्वोर्धर्मयोरपि पक्षे
तुल्यतासाधनमवर्ण्यसमा यथा तत्रैवानुमाने लोष्टादिगतनोदनादिरूपक्रियाहेतुगुणवत्त्वमात्मन्यसिद्धं तथा च
तुल्यत्वपाययाऽसिद्धेन क्रियाहेतुगुणेनात्मनि क्रियावत्त्वसाधनेन तथा तादृशेन क्रियावत्त्वेन तज्जनकगुणवत्त्वमपि
किमिति न साध्यते नियामकाभावादिति ॥६॥ दृष्टान्तविकल्पं प्रदर्श्य दार्ष्टान्तिके विकल्पकथनं विकल्पसमा । यथा तत्रैवा
नुमाने क्रियाहेतुगुणयुक्तं किंचिद्गुरु यथा लोष्टादिः किंचिल्लघु यथा वायुः । एवं क्रियाहेतुयुक्तं किंचित्क्रियावत्स्यात् ५९

यथा लोष्टादि किंचिदक्रियं यथा आत्मा पूर्वविकल्पो भवत्यपि तु न भवनीत्यत्र किं नियामकं स्यादिति ७ दृष्टांतस्य पक्षतुल्यता
कथनं साध्यसमा। सा। साध्यशब्दोऽत्र पक्षपरा वा। यथा तत्रैव यदि यथा लोष्टस्तथा आत्मेति त्वयोच्यते तदा यथा आत्मा तथा
लोष्टः स्यात् आगतं तथा च यथात्मनि क्रियावत्त्वं साध्यं तर्हि लोष्टेपि तत्साधनीयं नेति चेत्तर्हि यथा लोष्टस्तथा आत्मेति न वाच्यं
लोष्टसदृशः आत्मा आत्मसदृशो लोष्ट इत्यत्र नियामकाभावादिति ८ प्राप्याप्रसवस्थानं प्राप्तिसमा प्राप्तिश्च साध्यहेत्वोः
सामानाधिकरण्यं। यथा तत्रैव क्रियाहेतुगुणवत्त्वेनैव किमिति क्रियावत्त्वं साध्यते किमिति क्रियावत्त्वेन तादृशगुण
वत्त्वं न उभयोरविशेषादिति ९ अप्राप्याप्रसवस्थानमप्राप्तिसमा। यथा तत्रैव पूर्वोक्तदोषस्याप्राप्तस्य हेतोः साध्य
साधकत्वं वाच्यं तथा चाप्राप्तत्वाविशेषात् सर्वः सर्वं साधयेदिति अयमेव हेतुः साध्याभावं किमिति न साधयेत्साध्य
मेव तु साधयेदित्यत्र विनिगमकाभावादिति १० साधनपरंपराप्रसंगः प्रसंगसमा। यथा क्रियावत्त्वे क्रियाहेतुगुणव

त्वे साधनं तत्र किं साध्येन न हि साधने क्रिया कस्यचिदित्ति द्विरस्ति । एवं तत्रापि किं साधनाभिमतादि ११ दृष्टान्तो नैरात्म्यसाध्याभा
व साधनं भवति दृष्टान्ते माययातत्रैवक्तो यदृष्टान्तेन क्रियावत्त्वे साधिते निष्क्रियाकाशदृष्टान्तेन आत्मनो निष्क्रियत्वमे
व किं न स्यान्नासौ दृष्टान्तेन क्रियावत्त्वमाकाशदृष्टान्तेन निष्क्रियत्वं नैयत्र नियामकाभावादिति १२ अनुत्पत्त्या प्रत्य
वस्थानमनुत्पत्तिसमा । यथा घटोऽनित्यः जन्यैकत्वादिमा दोषः कश्चिदाह यदि जन्यैकत्वमनित्यत्वे प्रमाणं तदा घटे
एकत्वाभावात्सत्त्वेः पूर्वं तदभावान्नित्यत्वं नित्यत्वं स्यादनुत्पन्न एवेति १३ साधारणधर्मप्रदर्शनेन संशयोत्थापनं संशय
समा । यथा शब्दोऽनित्यः कार्यत्वादित्यादौ शब्दस्यानित्येन घटेन सहैन्द्रियकत्वरूपसाधर्म्यं यथास्ति तथा नित्येन सा
[illegible]त्वेन सह सामान्यसविषयत्वं साधर्म्यमस्तीति उभयसाधर्म्यदर्शनात्संशयः स्यात् एकपक्षनिर्णये नियामकाभा
वादिति ॥१४ व्याप्तस्य हेतोः साध्यविपरीतसाधकहेतुत्वेन रोधनं प्रकरणसमा । सत्प्रतिपक्षोदाहरणमेवास्योदाहर॰

णं बोध्यं १५ कालत्रयेऽपि हेतुत्वासंभवेनाहेतुत्वकथनमहेतुसमा। यथा कार्यत्वादिहेतुसाधनं साध्यस्यानित्यत्वात्पूर्वकाल
हेत्विर्वेत्तदा नित्यत्वरूपसाध्यस्य तदानीमभावात्कस्य साधकं। अथ पश्चात्कालवृत्ति तदा पूर्वकाले साधनाभावात्कस्य
साध्यधर्मानित्यत्वं। यदि चोभयमेककालवृत्ति तदा किं कस्य साधनं किं कस्य साध्यं विनिगमकाभावादिति। हेतुसमेति पाठे तु
कालत्रयेऽपि हेतुत्वस्यासंभवकथनं हेतुसमेत्यर्थो बोध्यः॥ १६ अर्थापत्तिपुरस्कारेणासाध्याभावोद्भावनं अर्थापत्ति
समा। यथा पूर्वोक्तानुमाने शब्दस्यानित्यसाधर्म्यादनित्यत्वं यदि तदार्थापत्त्या सिद्धं नित्यसाधर्म्यान्नित्यत्वमपि एक
तरावधारणे नियामकाभावादिति १७ सर्वाविशेषप्रसंगोद्भावनमविशेषसमा। यथा तत्रैव यदि कृतकत्वादिना।
नित्यघटादिसाधर्म्येण शब्दस्यानित्यत्वं तदा प्रमेयत्वादिरूपेणानित्यसाधर्म्येण सर्वस्यैवानित्यत्वं स्यात्तमदुक्तसाध
र्म्येणानित्यत्वसिद्धिप्रतितन्तु तदुक्तेनैतत्र नियामकाभावादिति १८ उभयपक्षसाधर्म्येणासाधनोपपत्तिकथनमुप

दीपि·प्र·

६१

यति समा। यथा यदि वा नित्यत्वसाधनं कार्यत्वमुपपद्यत इति शब्दस्यानित्यत्वं तदा नित्यत्वसाधनमपि किंचिदुपपद्यत इति नित्य
त्वं किं न स्यादिति १९ वाद्युपदर्शिते साधनाभावेपि साध्यस्योपलब्धिकथनमुपलब्धिसमा। यथा शब्दो ऽनित्यः प्रय
त्नानुविधायित्वाद्घटवदित्यत्र प्रयत्नं विनापि वायुनोदनवशात् वृक्षशाखाभंगजन्यस्य शब्दस्योपलब्धेः न प्रयत्ना
नुविधायित्वं शब्दस्येति २० वादिना ऽनुपलब्धिवशात्कस्यचित्पदार्थस्यानभिकारे ऽनुपलब्धिवशादेव बाधमिम
तस्यापि यत्किंचिदर्थस्याभावसाधनमनुपलब्धिसमा। यथा जलादेर्विद्यमानस्याप्यावरणवशादनुपल
ब्धिः तद्वत् उच्चारणात्पूर्वं शब्दस्य विद्यमानस्याप्यावरणवशादनुपलब्धिरित्येतन्मतं वादिना दूष्यते यद्यावरण
वशाच्छब्दो नोपलभ्यते तदा जलाद्यावरणवत् शब्दावरणमप्युपलभ्येतेति प्रत्युक्ते यदि भवद्भिरेवं नोप
पते तदा ऽनुपलब्धेरप्यनुपलब्ध्या ऽभावे सिद्धे तदभावादावरणाभावासिद्धावावरणसिद्धिरिति २१ धर्मस्यानित्यत्वा

नित्यत्वविकल्पाद्भिन्नतो नित्यत्वसाधनं नित्यसमा। यथा शब्दस्य पदनित्यत्वं भवद्भिरुच्यते तन्नित्यमनित्यं वा यदि नित्यं त
दा शब्दोपि नित्यः स्यात् तस्य सदा तत्त्वाच्छब्दस्यापि तथात्वमागतं अथानित्यं तस्याप्येकदाचिदनित्यत्वाभावोस्तीति नित्य एव श
ब्द इत्युभयथापि शब्दस्य नित्यत्वमिति २२ अनित्यदृष्टान्तसाधर्म्यात्सर्वानित्यत्वप्रसंगोद्भावनमनित्यसमा यथा घटानित्य
नपदेन साधर्म्यात्स्यादो। नित्य इत्युच्यते तत्र घटेनैकेनापि धर्मेण सर्वस्यैव तत्र सादृश्यात्सर्वस्यानित्यत्वप्रसंग इति २३ वायुत्पत्ते
तोऽन्यकार्यतापि संभवाभिधानं कार्यसमा। यथा तत्रैव प्रयत्नानुविधायित्वमुभयथापि संभवति घटादिवच्छब्दस्य स्वरूपोत्प
त्तौ जलादिवदावरकनिवृत्तेभ्यमभ्यत्रापि प्रयत्नानुविधानदर्शनात् तथा च तस्यावरकनिवृत्तिरूपकार्यान्तरस्य संभवा
त्नानित्यत्वनिपतत्वमिति॥२४ क्वचित्कारणासमेति पाठः। तस्यापि कारणस्य प्रयत्नानुविधायित्वस्योभयत्र शब्द
स्योत्पत्तोतरावरकनिवृत्तो वसमत्वाभिधानमितिरीत्याख्ये एवार्थे पर्यवसानम वसेयं। अत्र ग्रंथगौरवभयात्स

दीधि·प्र·

६२

स्यप्रमानप्रदर्शितत्ता। अभिपुक्तैरप्येतेनुसंधेयाः। निग्रहस्थानं लक्षयति वादिन इति। इदं च यद्यपि छलादावप्यस्ति तथाप्य
यांतरादिरूपनिग्रहस्थानमध्ये नाभावादक्षेयं च छलत्वादिनापि ज्ञानस्योपयोगित्वात् सप्र्यागुपादाने हेत्वाभासवत्तावत्स्या
वांतरभेदानुद्देशपाति प्रतिज्ञेत्यादिना। न च प्रतिज्ञानार्थविरुद्धाभ्युपगमः प्रतिज्ञानार्थपरित्यागो वा प्रतिज्ञाहानिः। प
याशब्दे गतित्स्या अप्रत्यक्षगुणत्वादित्य अस्यां शंकायामाश्रयासिद्धप्रत्यभिज्ञावलात्परेणवाधे उद्भाविते अस्तु तर्हि नित्यपरा
वन्नाणुरिति नित्यत्वमंगीकुर्वन्वादी शब्दस्यानित्यत्वप्रतिज्ञां जहातीति २ परोक्तदोषोद्दिधीर्षया पूर्वानुक्तविशेष
णविशिष्टतया प्रतिज्ञानार्थकथनं प्रतिज्ञांतरं यथा अशिष्टत्वादिकं गुणजन्यकार्यत्वादित्यत्राहृषज्ञात्वेन सि
द्धसाधनोद्भावने सति विषयकेतिगुणविशेषणदानं २ स्वोक्तसाध्यविरुद्धहेतुकथनं प्रतिज्ञाविरोधः यथा द्रव्यं गु
णभिन्नं रूपादितः पृथक्त्वेनानुपलभ्यत्वादिति २ स्वोक्ते दोषे परेणारोपिते स्वोक्तं मपलपति केनोक्तमयं वादी। निरस्य ६२

इति ५ परोक्तदूषणोद्धारेच्छया पूर्वोक्तहेतौ विशेषणान्तरोपादानं हेत्वन्तरं । ६ यथा शब्दो नित्यः प्रमेयत्वा
दित्यत्र सामान्ये व्यभिचारे दूषणे जातिमत्वे सतीति विशेषणोपादानं ॥ ७ ॥ प्रकृतानुपयुक्तार्थकथनमर्थान्तरं । यथा नित्य
:शब्दः अस्पर्शत्वात् नित्यः जबगडदश्त्वादित्यादि ॥ ८ ॥ परिषत्प्रतिवादिबोधप्रयोजकपदप्रयोगः अविज्ञातार्थं । तत्र क्लिष्टा
न्वयमप्रसिद्धार्थकं तत्तरीतोच्चारितमित्यादिरूपं ९ । परस्परानन्वितार्थकपदसमूहोऽपार्थकं । यथा शब्दं घटः पटः नि
त्यमनित्यं प्रमेयत्वादित्यादि १० अवयवानां व्युत्क्रमेण कथनमप्राप्तकालं । यथा शब्दत्वाच्छब्दो नित्य इत्यादि ११ पलिं
विद्ववयवत्यन्यावयवानभिधानं न्यूनं स्पष्टं १२ अधिकहेत्वादिकथनं अधिकं । यथा शब्दो नित्यः शब्दत्वात् श्रावणत्वाच्चे
त्यादि १३ अनुवादं विना कथितस्य पुनः कथनं पुनरुक्तं । यथा शब्दोऽनित्यः शब्दोऽनित्य इत्यादि १४ परिषदा त्रिरभि
हितस्याप्यननुवादः अननुभाषणं परिषदा विज्ञातस्य वादिना त्रिरभिहितस्य वाक्यार्थस्याबोधः अज्ञानं १५ उत्तरं हि

दीपि०
६३

परोक्तं बुद्ध्वापि जिज्ञासास्फूर्तिवशात्तूष्णींभावः अप्रतिभा १६ असंभवत्कालांतरककार्यव्यासंगमुद्भाव्य कथाविच्छेदो
विक्षेपः ॥१७॥ स्वपक्षे दोषमनुद्धृत्य परपक्षे दोषाभिधानं मतानुज्ञा १८ उद्भावनार्हपरकीयनिग्रहस्थानानुद्भावनं पर्यनुयो
ज्योपेक्षणं १९ निग्रहस्थानरहिते निग्रहस्थानोद्भावनं निरनुयोज्यानुयोगः २० एकसिद्धांतमाश्रित्य कथाप्रवृत्तौ तद्विरुद्ध
सिद्धांतमालंब्य प्रत्यवस्थानं अपसिद्धांतः २१ प्रतिज्ञाहान्यननुभाषणाज्ञानाप्रतिभाविक्षेपपर्यनुयोज्योपेक्षणानामभावे
अन्येषां हेत्वाभासव्यतिरिक्तनिग्रहस्थानानां गुरोर्हेत्वाभासानां च द्व्यादिघटितत्वेनांतर्भावो यथायथं बोध्यः आतिरिक्तः सूत्रार्थः
सुगम इत्यभिप्रायेणाह शेषमिति । ननु नलसंयोगे सत्यपि मण्यादिसमवधाने दाहो न जायत इति मण्यादेः प्रतिबंधकत्वा
भ्यासाच्च वह्नेर्दाहानुकूलशक्तिस्वीकार एव निर्वहति प्रतिबंधकत्वापाः कार्यानुकूलशक्तिविघटकत्वरूपत्वादन्यथा
नुपपत्तेरिति नैयायिकाः शक्तेरतिरिक्तत्वान्न सप्तैव पदार्था इत्यसंगतमिति प्राभाकरः शंकते नन्विति । नन्वेवं शक्तिसिद्धावपि नस्या ६३

अतिरिक्तत्वासिद्धिरिति चेन्न पतोननावद्भ्यातिकारणत्वमादिसंयोगकालावच्छेदेन तत्र विघमानार्थकं कालीनां तमभावविशे
षणं। तथात्वं नादृशप्रागभावस्य भस्मादिसंयोगकालावच्छित्तेः गुणादिष्वृत्तित्वात् अत एव न गुणकर्मान्यतररूपा। न च सामान्या
घन्यतमरूपा। उत्पत्तिविनाशशालित्वात् एवं चातिरिक्तपदार्थत्वसिद्धिरिति। प्रतिबंधकत्वं न कार्यानुकूलशक्तिविघटकत्वं अपि
नु कारणीभूताभावप्रतियोगित्वं न च मणिप्रभावस्य हेतुत्वादेवोपपद्यते मणिसमवधानदशायां च तदभावरूपकारणं नरा
भावादेव दाहानुत्पत्तिसंभवात् स्वं चातिरिक्तशक्तिस्वीकारे: नुचितस्याद्यायेन समाधानेऽप्रतिबंधकाभावस्येति। ननु दाहोत्पा
देवह्निः शक्तिरिति व्यवहारात् यथानुपपत्त्या सेस्य सतिरिक्तशक्तिरित्याशंक्य तस्याः कारणतारूपत्वे पि व्यवहारोपपत्तेर्नाति
रिक्तशक्तिसिद्धिरित्याह कारणत्वस्येति ननु मणाद्यभावस्य हेतुत्वे मणिसमवधानदशायां सत्यप्युत्तेजके दाहो न स्या
त् मन्मते तु मण्याद्यपसरणदशायामिवोत्तेजकसमवधानदशायामपि वह्नौ दाहानुकूलशक्तत्वं तरोस्त्यंगीकारेण न दो

धत्तित्वेनऽत्तेजकाभावविशिष्टमरणप्रागभावस्यकारणतांगीकारेणादोषात् नवोत्तेजकानामननुगतत्वात्तत्तदुत्तेजकाभाव
कूटविशिष्टमरणप्रागभावस्यैवकारणतायाः कल्पनीयतयागौरवमितिवाच्यंदाहानुकूलशक्तिमत्त्वेनतादृशकारणतायास्त
वाप्यावश्यकत्वात्तस्मिन्नंतरा शक्तित्वप्रागभावत्वेसंकल्पनेमहागौरवादितिसंक्षेपः ॥ नन्वेवमपि कांस्यादेरस्पृश्यवस्तुस्प
र्शेसति न भोजनादिरूपकार्यार्हत्वाशक्तिमत्कांस्यादेरेव नत्वर्हत्वात्तस्य अस्पृश्यस्पर्शेसतिराजेन्नीशात् भस्मादिसंयोगे पुनःश
केरुत्पादान्नत्वर्हता एवं च कांस्यादावबाधेयशक्तिरंगीकार्या नच कांस्यादौ भोजनादिकं प्रत्यस्पृश्यस्पर्शस्यप्रतिबंधकत्व
कल्पनादेवोपपत्तौ न शक्तेरंगीकार इतिवाच्यं प्रत्येकंतेषामस्पृश्यस्पर्शस्य संस्पृश्यसंयोगरूपतयासत्तितत्राशेषप्रतिबंधकाभा
वसद्भावात् कांस्यादावंतराभस्मादिसंयोजनं भोजनार्हतायनेरिरिष्टनःप्रसज्जतिच तेनतुभस्मादिनेन्निप्रथमेनादिपदे
नाम्लादेः द्वितीयेन चताम्रादेः परिग्रहः ॥ अस्पृश्यसंसर्गविशेषेणोत्पन्नकांस्यादेः अशुद्धतोपपत्त्यावतिरिक्तशक्त्यंगीकारोनुचित इतिसमा ६८

ष्टे भस्मादिसंयोगेति यत्रकांस्यादौ भस्मादिसंयोगादिध्वंसानंतरं पुनरस्पृश्यस्पर्शः तत्रापि भस्मादिसंयोगध्वंसस्य सत्वात् अप्राप
त्तिरतः साहित्यांतं ध्वंसविशेषणं साहित्यं चात्र संबंधविशेषनियंत्रितं सामानाधिकरण्यं यत्किंचिदस्पृश्यस्पर्शाभावस्यान्त्यसद्भा
नेदापत्तिस्तत्रध्वंस्येवेमत्तोपावदितितथाचतत्रयावंतस्तत्तदस्पृश्यस्पर्शाभावानांविशेषणतासंबंधेनाभत्वात्रोक्तदोषइतिभावः न
नुर्नाहि कुत्रापि शुद्धत्वं न स्यात् अस्पृश्यस्पर्शप्रागभावस्यापि यावदंतर्गततया तस्याः स्पृश्यस्पर्शोत्तरकालिकभस्मादिसंयोगध्वंस
कालेऽसत्वेन तादृशाभावकूटसामानाधिकरण्यविशिष्टभस्मादिसंयोगध्वंसस्य सत्वासंभवादतो भस्मादिसंयोगकालावच्छेदे
न तत्र विद्यमानार्थकं कालीनांतमभावविशेषणं । तथाचतादृशप्रागभावस्य भस्मादिसंयोगकालावच्छेदेन तत्रासत्वेन यावदंतं
र्गततया न दोषः । न च यत्रास्पृश्यस्पर्शध्वंसोत्तरं भस्मसंयोगस्ततस्तद्ध्वंसः पुनरस्पृश्यस्पर्शः तद्ध्वंसानंतरं भस्मसंयोगस्तद्ध्वं
सोत्तरा तत्र शुद्धत्वानुपपत्तिः द्वितीयास्पृश्यस्पर्शप्रागभावस्य प्राथमिकभस्मसंयोगकालिकतया यावदंतर्गतस्य द्वितीयास्पृ

दीदि॰प्र
६९

रूपस्पर्शनाशध्वंसदशायामिव तदुत्तरसमये। भावादित्ति वाच्यं न पारदृशभस्मसंयोगध्वंससमादाय शब्दत्वव्यवहारस्तादृशभस्मसं
योगकालिकत्वं निवेशनीयमित्यत्र तात्पर्यमेवं च तादृशयावदभावसामानाधिकरण्यविशिष्टं द्वितीयभस्मसंयोगध्वंससमादाये
व तदा शब्दत्वोपपत्तिः प्रथमभस्मसंयोगध्वंसकाले तु तादृशं प्राथमिकभस्मसंयोगध्वंससमुपादाय शब्दनिर्वाह इति संक्षेपः। दै
त्रस्येदं धनमित्यादौ धनादौ यत्स्वत्वं प्रतीयते तत्पदार्थान्तरमिति मतं निरस्यति स्वत्वमपीति। अपि नानुगतसमुदायापकेन प्रतियो
गित्वादिपरिग्रहः। ननु नन्वहिसत्वं किंस्वरूपमित्यत आह यद्वेति। तत्र स्वत्वे रक्तं चेति। तादृशायोग्यत्वप्रयोजकं स्वित्यर्थः। प्रतियो
गित्वं प्रतियोगिरूपं प्रतियोगितावच्छेदकरूपं चेत्यादिकं बहुतरमूहनीयं। सर्वेषां पदार्थानामनुगमपदार्थं वुयथायथमन्तर्भाव
नीरूयम्। तस्य अनन्तापरिहर्तुं विधिं निरूपयिष्यमाणः शिष्यावधानाय तन्निरूपणं प्रतिजानीते अथेति। त्वपरमतसाधर
णं विधित्वं तावन्निर्वक्तिमयत्नेति। प्रयत्नजनिकायाश्चिकीर्षा तज्जनकं यज्ज्ञानं तद्विषयः इत्यर्थः। गुरुमते कृतिसाध्यताज्ञान ६९

स्यत्वमते च कृतिसाध्यत्वविशिष्टेष्टसाधनताज्ञानस्य चिकीर्षाद्वारा प्रवर्त्तकत्वात्तन्मते कृतिसाध्यत्वे स्वमते च कृतिसाध्येष्टसाध
नत्वे लक्षणासंगतिः अभिधायकस्य विधित्वमिति मताभिप्रायेणाहृतत्वमीति तादृशज्ञानविषयकार्यत्वादित्यत्र तियादृकालिङ्
दित्यर्थः। लिङादीत्यादिना लोट्तव्यादिसंग्रहः। वाकारोनास्थायां। गुरुमतमाशंकते कृत्यसाध्यइति। कृत्यसाध्यत्वेनावगत
इत्यर्थः। प्रवर्त्तकमिति चिकीर्षाद्वारा प्रवृत्तिजनकमित्यर्थः। न च कृत्यसाध्यत्वज्ञानाभाव एव प्रवर्त्तकोस्त्विति शंक्यं कृत्यसाध्यत्व
ज्ञानाभावत्वेन तत्त्वे गौरवात् कृतिसाध्यत्वाभावकृतिसाध्यभेदतत्तद्व्याप्यादिदर्शनानां प्रवृत्तौ प्रतिबंधकत्वकल्पनेन महागौ
रवाच्चेति दिक्। ननु विषभक्षणादौ प्रवृत्त्यापत्तिः कृतिसाध्यताज्ञानस्य तत्रापि सत्त्वादित्याशंका निराकरोति न चेत्यादिना इ
ष्टसाधनतालिंगकेति अयं मत्कृतिसाध्यः मत्कृतिं विना अनुपपद्यमानत्वे सति इष्टसाधनत्वादित्यानुमानिके इत्यर्थः। काम्य
स्यत्वरति प्रवर्त्तकत्वादित्यनेनान्वयः। ज्योतिष्टोमयागादेरित्यर्थः। विहितकाले स्यादिति। विहितकालस्य जीवित्वज्ञाना

दीधि॰प्र॰

६६

धीनस्य कृतिसाध्यताज्ञानस्य नित्ये संध्यावंदनादौ अशौचादिरूपनिमित्तज्ञानाधीनस्य तस्य नैमित्तिकेत्वानादौ प्रसक्तेनैकत्वादित्यर्थः॥
अत्र हमेन कालिककृतिसाध्यसंध्यावंदनकः एतत्कालशुचित्वे विलादित्येवंरीत्या कृतिसाध्यत्वज्ञानस्य विहितकालशुचित्वज्ञानविल्वा
दिज्ञानजन्यत्वमवसेयं। अननुगम इति। प्रवृत्तिसामान्यप्रयोजकस्यैकस्याभावादिति भावः। स्वविशेषणावत्तेत्यादि। स्वपदं वर्त्तमानः
पुरुषः। तस्य विशेषणं तन्निष्ठो धर्मः कामनादिः तद्वृत्तायाः स्वविषयसाधनतादिरूपस्य तत्संबंधस्य प्रतिसंधानं ज्ञानं तज्जन्यत्व
स्येत्यर्थः। लाघवेनेति। कारणतावच्छेदकलाघवेनेत्यर्थः। ननु तेषां कारणतावच्छेदकस्य जन्यत्वादिघटितत्वाद्गौरवमिति भावः
कृतिसाध्येष्टसाधनतेति। अत्र वलवदनिष्टाननुबंधित्वमप्यंतर्भावनीयं। तेन कृतिसाध्यत्वेनेष्टसाधनत्वेन चावगते विषसंप
र्कभोजनादौ प्रवृत्त्यापत्तिः। विशिष्टज्ञानत्वावच्छिन्नस्य कारणत्वकथनं तु प्राचां मतेन न त्वस्मन्मते कृतिसाध्यत्वादिज्ञानानां पृथगेव
दंडचक्रादिन्यायेन कारणत्वात॥ प्रथमेति। प्रवृत्तीत्यर्थः। प्रत्यवायेति। प्रत्यवायस्य परिहारः प्रागभावः तस्य वदुःखजनकाभावत ६६

यागनाशस्यैवेष्टत्वेन फलत्वमिति भावः। ननु कथं तन्नागभावस्य फलत्वं तस्यानादित्वादिति वाच्यं यत्सत्वे यत्सत्वमिति व्यवहारल
भ्यस्य स्वरूपसंबंधरूपस्य संध्यावंदनप्रयोज्यत्वस्य तत्र सत्वेन फलता स्यात्तेष्टिप्रयवेयं। लिङादेः कार्य एव शक्तिरिति गुरुमतमा
शंकते नन्विति। इच्छाविशेषरूपस्य यागस्याशुतरविनाशिनः स्वर्गसाधनत्वेन भानेन संभवति अयोग्यत्वादित्यपूर्वरूप एवका
र्ये शक्तिरिति कार्यत्वाद् यागस्येति। आशुतरविनाशिनः। जनीय क्षणे इति ध्वंसप्रतियोगिनः। स्थायि। फलपर्यंतस्थायि। अ
न्वयप्रकारं दर्शयति कार्यं कृतिसाध्यमिति। कार्यबोध इति। इदं मत्कृतिसाध्यमिति ज्ञानवानित्यर्थः। विध्यर्थमुख्यविशेष्यक
बोधं दर्शयति तेनेति तथान्वयेनेत्यर्थः। अयमतनुतत्र कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनयागानुकूलकृतिमान् स्व
र्गकाम इति वाक्यार्थबोधः। ननु अपूर्वस्य पूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रह इति चेदत्र प्राचां संभिन्नाः तन्मतेन दर्शनावदि
त्वविषयकयागबोधं प्रति तद्धर्मावच्छिन्नविषयकशक्तिग्रहस्य तादृशोपस्थितेश्च हेतुता न तु समानविषयकत्वेन हेतुहेतुम

भावः एवं च कार्यत्वावच्छिन्ने यत्र कुत्रचिच्छक्तिग्रहः योग्यतावलात् अपूर्वरूपकार्यस्य शाब्दबोधे भानं न हि यागविषयकमन्यका
९८ र्यं संभवतीति ॥ ननु निसेफलाभावात्कथं तत्रापूर्ववोधकत्वे मत आह यावज्जीवमिति । अपूर्वमेवेत्ति । कार्यत्वेनेत्यादिः । पंडापूर्व
मित्यर्थः ॥ लौकिकस्यत्वेपूर्वभानासंभवादाह आरोग्येति । क्रिया कार्यमिति । स्वार्थत्वनिष्ठकार्यत्वस्य मर्थः ॥ लौकिकालौकि
कसाधारणेपनकार्यत्वादेवविलिङादेः शक्तिरंगीकार्येत्याशयेन समाधत्ते यागस्येति । अयोग्यत्वाद्यागस्य साधनत्वेन भा
नं न संभवतीत्युक्तदोषं निराचष्टे । अयोग्येति । अयोग्यतासंशयसत्वेपि तत्स्याविघटकत्वात् शाब्दबोधो भवत्येवेति भावः । या
गादिषु साधनत्वे यागेः वगते न स्याद्युत्तरविनाशिनो व्यापारं विना फलजनकत्वासंभवात्तन्निर्वाहाय अपूर्वकल्पनतस्माह तन्
न्निर्वाहार्थमिति । ननु यागध्वंसस्यैव व्यापारत्वमस्तु किमपूर्वकल्पनेनेत्यत आह कीर्तनादिनेति । आदिना कर्मनाशाजलस्प
र्शोत्करतोयाविलंघनानि । गंडकीबाहुतरणात्धर्मः क्षरति कीर्तनादित्यत्रोक्तकर्मनाशाजलस्पर्शादिपरिग्रहः । ध्वंसस्य व्यापार ९८

त्वे स्वर्गं यागाश्यत्तिरित्यपि दूषणं निभावनीयं। लोकव्युत्पत्तीति। लोकव्यवहारेत्यर्थः। स च योयत्र प्रवर्त्तते स कृतिसाध्यत्वेनेष्टसाधनत्वे
न च तज्ज्ञानातीत्येवंरूपः। केचित्तु पदिष्टया पत्रप्रवृत्तिसत्त्वतत्साधनमितिरूपो लोकव्यवहार इत्याहुः। नव्यास्तु पुनः लोके पचेत्यादिलि
ङादिसमभिव्याहारस्थले क्रियायामेव कृतिसाध्यत्वविशिष्टेष्टसाधनत्वबोधः इति नियमबलादित्यर्थः। सर्वत्रेति शेषः इति व्याचख्युः।
आख्यातत्वेनेति। न त्वसंकेतसंबंधेनाख्याततया त्वत्वं। तिलादिकमेव शक्यतावच्छेदकमिति नवीनाः। यत्नार्थकत्वं। कृतित्वावच्छि
न्नवाचकत्वं। किं करोतीति। कृतित्वावच्छिन्ने जिज्ञासितसंबंधबोधकं हि तस्य प्रश्नवाक्यस्य उत्तरवाक्यस्य कृतित्वावच्छिन्नेयाकसंबंधबो
धकत्व एव तत्प्रश्नवत्तेकत्वं नान्यथेति भावः। न तु रथो गच्छतीत्यादौ व्याख्यानस्य कृतिबोधकत्वासंभवात्तदनुरोधेन व्यापारए वशक्ति
र्वक्तव्येत्यत आह रथो गच्छतीत्यादाविति। व्यापारेऽनुकूलत्वोक्तौ तेनं तु तेन संबंधेन व्यापारेण मनस्यान्वयताभाय। नव्याः पुनः ग
च्छतीत्यत्राख्यातस्य ज्ञानातीत्यादाविवाश्रयत्वे निरूढलक्षणा न चाश्रयतासंबंधे चैव प्रथमान्तार्थे गमनादेरन्वयेन निर्वाहे आश्र

दी॰पि॰प्र॰ प्रत्वेनिरूढलक्षणाकल्पनं निरर्थकमिति वाच्यं नामार्थयोरविवक्षात्वर्थनामार्थयोरभेदान्निरूढसंबंधेनान्वयस्याव्युत्पन्नत्वात्तत्र
६८ त्या॰ न्वयासंभवात् । स्तोकं पचतीत्यादौ स्तोकादेर्धात्वर्थेऽन्वयाद्भेदातिरिक्तेनिःश्रेय । वैयाकरणामतं निराकरोतु देवदत्तः पचति
।नाख्यातार्थत्वमिति । आख्यातस्य कर्त्रादौ शक्तिस्वीकारेऽनन्तकत्वादेः शक्यतावच्छेदकत्वमंगीकर्तव्यं कृत्यादौ शक्तिस्वीका
रे तु कृतित्वादिजातेः शक्यतावच्छेदकत्वाल्लाघवमिति भावः । नन्वेतु कर्त्रादीनामेवेति । आख्यातार्थत्वमिति प्रवैयाकरणान्वयः
। आदिना कृत्यादिपरिग्रहः । ननु तर्हि कर्तृकर्मणोः कथं लाभ इत्यत आह तयोरिति । आक्षेपादेवेति परमते नाख्यमते तु
प्रथमांतपदेनैव तल्लाभः । देवदत्तः तंडुलं पचतीत्यत्र तंडुलकर्मकपाकानुकूलकृतिमान्देवदत्त इत्यन्वयबोधः । देवदत्तेन
पच्यते तंडुलः इत्यत्र तु देवदत्तसमवेतकृतिजन्यपाककर्मीभूतस्तंडुल इति शाब्दबोधः । न चैवन्नः पचतीत्यत्र द्वितीयातंडुलः प
च्यत इत्यत्र द्वितीयास्यात्तत्र कर्तृकर्मणोराख्यातेनानभिधानादितिवाच्यं अनभिहितेकर्तृत्वे तृतीयायाः तादृशे च कर्मत्वे ६८

द्वितीयायाः विधानेनादोषादितिभेपं। उपसर्गाणां वाचकत्वमतं निरस्यति प्रणयतीत्यादाविति। ननु धातुनैव प्रकर्षादेर्बोधे प्रशा
दादेर्वैयर्थ्यमत आह उपसर्गाणामिति। द्योतकत्वं। तात्पर्यग्राहकत्वं। एतेन इतरनिपातानां वाचकत्वमिति सूचितं। तथा हि
एवकारस्यायोगव्यवच्छेदोर्थः शंखः पांडुर एवेत्यादौ अन्ययोगव्यवच्छेदः पार्थ एव धनुर्धर इत्यादावित्यादि कं बहुतरमूह
नीयं। प्रेक्षावत्प्रवृत्तेर्येसकलकामनाविषयमुक्तिप्रयोजनकत्वं तां प्रत्यस्य दर्शयन्निपदार्थज्ञानस्येति। पदार्थतत्त्वज्ञानस्य
त्यर्थः। अस्मेषामवांतरप्रयोजनानामपि सद्भावादाह परमेति। श्रुतेरयमर्थः आरे मुनु श्रुणाभ्यामात्मा द्रष्टव्यः मुमुक्षोरात्म
दर्शनमिष्टसाधनमितियावत्। आत्मदर्शनोपायं प्रदर्शयति श्रोतव्य इत्यादि। तेनार्थक्रमेण शाब्दक्रमस्त्यक्तो भवतीति
अग्निहोत्रं जुहोति यवागूं पचतीत्यादिवत्। असंभावनानिवृत्तेरिति। अप्रामाण्यशंकानिवृत्तेरित्यर्थः। श्रुतमनुसंधानेति
अयं भावः युक्तिभिरनुचिंतनं मननं तच्च आत्मनः इतरभिन्नत्वेनानुमानं तच्च भेदप्रतियोगीतरज्ञानसाध्यं तद्दर्थसकल

दीपि॰प्र॰
९९

पदार्थनिरूपणमिति। मोसोऽयं योगिविशारदपतितद्दर्शनंतरमिति। मननानंतरमित्यर्थः। श्रुतस्यार्थस्यैनैरंतर्येणानुसंधा
नरूपनिदिध्यासनस्योपायमाह योगविधिनेति। इंद्रियाणि विषयेभ्यः प्रत्याहृत्य इंद्रियेभ्यो मनः प्रत्याहृत्य साक्षात्कर्त
व्यवस्तुनि मनःप्रणिधानं योगः। तदनंतरं निदिध्यासनानंतरं। मिथ्याज्ञाननाशे। वासनासहितमिथ्याज्ञाननाशे। दो
षः। रागादिः। एवकारेण कर्मणो व्यवच्छेदः। मिथ्याज्ञानेनेति। शरीरादौ आत्मत्वभ्रमो विशेषज्ञानेनैव यथा निवर्तते तथा
प्रकृतेपीति भावः। कैवल्यं लभते नरः इत्यादीत्यादिना क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यादिश्रुतेः ज्ञानाग्नि
ः सर्वकर्माणि भस्मसात्कुरुते इत्यादिस्मृतेश्च संग्रहः। ज्ञानद्वारेवेति। अत्रायं क्रमः निष्कामनया भगवदर्पितस्य
कृतैः कर्मभिः दुरितक्षयरूपात्मशुद्धिर्भवति ततो विषयेषु वैराग्यं ततः श्रवणादौ प्रवृत्तिः ततः श्रवणादिक्रमेण तत्त्व
ज्ञानोत्पत्तौ पूर्वोक्तमिथ्याज्ञाननाशादिक्रमेण मोक्षनिष्पत्तिः। अधिकमस्मद्दीपावलिनवचिंतामणिव्याख्यायामनुसं ९९

धेयं तर्ककर्कशविचारचातुरीधुरीणोरिति। कौंडिन्यगोत्रसंभूतो नीलकंठाख्यपंडितः। कृतिमार्पयदेतस्मै चंद्रचूडाय मं
गले १ इति श्रीमत्प्रमाणपोपनामककौंडिन्यवंशपयःपारावारराकाचंद्रायमानपदवाक्यप्रमाणपारावारीणश्रीमा
मभट्टतनूजश्रीनीलकंठभट्टविदुषा विरचितः तर्कसंग्रहदीपिकाप्रकाशः ॥ समाप्तः ॥ श्रुतिः प्रमाणं स्मृतयः प्र
माणं वराः प्रमाणं पुरुषः प्रमाणं कालः प्रमाणं नयनीतिः प्रमाणं न्यायमतिः सूक्तिरपि प्रमाणम् ॥ ॥ शुभमस्तु ॥

[OrderDescription]
,CREATED=23.09.19 12:29
,TRANSFERRED=2019/09/23 at 12:54:20
,PAGES=145
,TYPE=STD
,NAME=S0001894
,Book Name=M-2160-NYAY DIPIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF

FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF

FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF

FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF